हीपवत्प्रभुं॥११२॥ आत्मव्यतिरिक्तविषयेभ्योमनोबुद्धिस्मृतींद्रियाणिप्रत्याहृत्यात्मैकविषयाणिकृत्वात्माध्येयः। योसौ
प्रभुर्निर्वीतस्थप्रदीपवद्देहीप्यमानोनिःप्रकंपोहृदिस्थितिं॥ एतदेवचतस्यध्येयत्वंयच्चित्तवृत्तेर्बहिर्विषयावभा
सनिरस्कारेणात्मस्वरूपतानामाशरावसंपुटनिरुद्धप्रभाप्रतानमसारस्यवप्रदीपैकनिष्ठत्वंयस्यपुनश्चित्तवृत्तिनिरो
धंबनतयासमाधीनाभिरमतेतेनशब्दब्रह्मोपासनंकार्यमित्याहं॥ यथाविधानेनषडंगमागायमविच्युतं॥ साव
धानस्तथाभ्यासात्परंब्रह्माधिगच्छतिं॥११३॥ स्वाध्यायावगतमार्गानतिक्रमेणासामागेयंगानंसाम्नोगानात्मक
मेवेपिगायमितिविशेषणंप्रगीतमंत्रस्यकथासार्थंअविच्युतमस्खलितंसावधानःसामश्चत्यनुस्यूतात्मैकाग्रचित्त
वृत्तिःपठनंतदभ्यासवसात्तंत्रनिष्णातःशब्दाकारब्रह्मोपासनेनपरंब्रह्माधिगच्छतिं॥ ॥तृतीयं॥ ॥शब्दब्रह्म
णिनिष्णातस्यतात्मोपासनंकार्यमित्याहं॥ अपरांतकमुख्योपंमयिकंप्रकरीतथा॥ त्रिवेणाकंसरोविंदुमुत्तरं
गीतकानिच॥११४॥ ऋगाद्यापाणिकास्त्रीविहिताब्रह्मगीतिका॥ गेयमेतन्नरस्योपासकरणान्मोक्षसंज्ञितं॥११५॥ अ
परांतकोह्योपमइकमकर्यावेनकामिसरोविंदुकसहितंचोत्तरमित्येतानिप्रकाराणाख्यानिमब्रह्मगीतकानि
वशब्दात्सारितवर्धनानकादिमहागीतकानिगृह्यंतेऋगाद्याश्चतस्रोगीतिकाइत्येतरपरांतकादिगीतज्ञानम

मि प्र
३४

ध्यारोपितात्मभावं मोक्षसाधनत्वान्मोक्षसंगितं मंतव्यं तदभ्यासस्यैकाग्रतापादनद्वारेणात्मैकतापत्तिकारणत्वात्॥ ॥
किंच॥ ॥वीणावादनतत्वज्ञः श्रुतिजातिविशारदः॥ तालज्ञश्चाप्रयासेन मोक्षमार्गं निगच्छति॥११६॥ भरतादिमुनिप्र
तिपादितवीणावादनतत्ववेदी। भ्रूयत इति श्रुतिर्द्वाविंशतिविधा सदा स्वरेषु। तथाहि। षड्जमध्यमपंचमाः प्रत्येकं चतुःश्रु
तय ऋषभधैवतौ प्रत्येकं त्रिश्रुती। गांधारनिषादौ प्रत्येकं द्विश्रुती इति। जानयस्तु षड्जादयः सप्तशुद्धाः संकरजातयः
स्वेकादशेत्येवमाष्टादशविधास्तासु विशारदः प्रवीणः। ताल इति गीतपरिमाणं कथ्यते। तत्स्वरूपज्ञश्च तदनुविद्धब्र
ह्मोपासनतया तालादिभंगभयाच्चित्तवृत्तेरात्मैकाग्रतायाः सुकरत्वादल्पायासेनैव मुक्तिपथं निगच्छति प्राप्नोति। चित्तवि
क्षेपाद्यंतरायहतस्य गीतज्ञस्य फलांतरमाह॥ गीतज्ञो यदि योगेन नाप्नोति परमं पदं॥ रुद्रस्यानुचरो भूत्वा सह तेनैव मो
दते॥११७॥ गीतज्ञो यदि कथंचिद्योगेन परमं पदं न प्राप्नोति तर्हि रुद्रस्य सचिवो भूत्वा तेनैव सह मोदते क्रीडतीति। पू
र्वोक्तमुपसंहरति॥ अनादिरात्मकथितस्तस्यादिस्तु शरीरकं॥ आत्मनश्च जगत्सर्वं जागतश्चात्मसंभवः॥११८॥ प्रागु
क्तरीत्या अनादिः आत्मा क्षेत्रज्ञस्तस्य च शरीरग्रहणमेवादिरुद्भवः कथितः। अजः शरीरग्रहणादित्यत्र। परमात्मनश्च स
काशात्पृथिव्यादिसकलभुवनोद्भवतदुद्भूताच्च पृथिव्यादिभूतसंघाताज्जीवानां स्थूलशरीरतया संभवश्च कथित
तः सर्गादौ स यथाकाशमित्यादिना॥ ॥एतदेव प्रश्नपूर्वकं विवृणोति॥ ॥कथमेते द्विमुह्यामः सदेवासुरमानवं॥
जगदुद्भूतमात्मा च कथं तस्मिन्वदस्व नः॥११९॥ यदेतत्सकलसुरासुरमनुजादिसहितं जगत्तदात्मनः सकाशात्कथमुत्प

एम
३४

त१

[redacted]

स्थ्यारु२

स्थकं पृष्ठे पश्चिमभागे पंचचत्वारिंशदस्थीनि भवंति। ग्रीवा कंधरा सा पंचदशास्थिः भवेत्। वक्षोंसयोः संधिर्यत्तु
प्रतितत्वेकैकं। हनुश्चिबुकं। तत्राप्येकमस्थीत्येवं चतुषष्टिः॥ किंच॥ तन्मूले द्वे ललाटाक्षिगंडे नासाद्यनासिका॥

पार्श्वकोस्थ्नांलक्षैकं सार्धमर्बुदैश्चद्विसप्ततिः ॥९७॥ तस्याधोर्मेलेस्थ्नी द्वे ललाटं भालमक्षिचक्षुः गंडः कपोलाक्षयोर्मध्यप्रदेशः तेषां समाहारो ललाटाक्षिगंडं तत्रप्रत्येकमस्थ्नां नासाधनसंज्ञकास्थिमती पार्श्वकाः कक्षाधःप्रदेशसंबद्धान्यस्थीनि तदाधारभूतानिस्थालकानि तैः स्थालकैः अर्बुदैश्चास्थिविशेषैः सहयार्श्वकास्थिसप्ततिः पृथिवीकैश्चनवभिः सार्धमेकाशीतिर्भवंति ॥ किंच ॥ द्वौशंखकौकपालानिचत्वारिशिरसि संधौ उरःसंज्ञदशास्थ्नि पुरुषस्यास्थिसंग्रहः ॥९८॥ मूलकर्णौयोर्मध्यप्रदेशावस्थिविशेषौशंखकौशिरसि संबंधीनिचत्वारिकपालानिउरोवक्षस्तत्संज्ञदशास्थिकांडत्येवंत्रयोविंशतिः पृथिवीकैश्चसहषष्ट्यधिकंशतंत्रयमित्येवं पुरुषस्यास्थिसंग्रहउक्तः ॥ सविषयाणींद्रियाण्याह ॥ गंधरूपरसस्पर्शशब्दाश्चविषयाःस्मृताः ॥ नासिकाक्षिरसनत्वक्श्रोत्रंचेंद्रियाणिच ॥९९॥ एतेगंधादयोविषयापुरुषस्यधनहेतवः विषयशब्दस्यचित्रंधनेत्यस्यधातोर्कर्मण्यत्वात्र्आतेश्चगंधादिभिर्वीप्सयेनव्यवस्थितैः स्वस्वगोचरंविंदंतीसाधनतयानुसेयानिघ्राणादीनिपंचेंद्रियाणिभवंति ॥ कर्मेंद्रियाणिदर्शयितुमाह ॥ हस्तौपायुरुपस्थंचजिह्वापादौचपंचवै ॥ कर्मेंद्रियाणिज्ञानीयान्मनीषिभिरुदाहृतैः ॥१००॥ हस्तौप्रसिद्धौ पायुर्गुदं उपस्थंरतिसंपाद्यसुखसाधनं जिह्वाप्रसिद्धा पादौचरणौतानिहस्तादीनिपंचकर्मेंद्रियाणि आदानविहरणनिर्दव्यहारविहरणैकर्मसाधनानि ज्ञानीयान्मनोंतःकरणं युगपत्तज्ज्ञानानुत्पत्तिलिंगत्वात्तच्चबुद्धिकर्मेंद्रियसहकारिणयोभयात्मकं प्राणायतनानिदर्शयितुमाह ॥ नाभिरोजोगुदंशुक्रंश्रोणितंशंखकौतथा ॥ मर्कासकंदहृदयंप्राणस्यायतनानितु ॥१०१॥ नाभिप्रभृतीनिदशप्राणस्यस्थानानि समाननाम्नःपवनस्यसकलशरीरसंचारित्वेपिनाभ्यादिस्थानविशेषवाचोयुक्तिः प्राचुर्याभिप्रायाप्राणायतनानिप्रपंचयितुमाह ॥ वपावसावहननंनाभिस्त्रोमयकृत्पिहा ॥ क्षुद्रांत्रंवृक्कौवस्तिःपुरीषाधानमेवच ॥१०२॥ आमाशयोपक्वहृदयंस्थूलांत्रंगुदमेवच ॥ उदरंचगुदेकोष्ठोविस्तारोयमुरुद्वयं ॥१०३॥ वपाप्रसिद्धावसामांसस्नेहः नाभिःप्रसिद्धा अवहननंकुंफुसः प्लीहान्नायुर्युवेरप्रसिद्धः स्तोचमांसपिंडाकारोसव्यकुक्षिगतोयकृत्कालिकाख्यो मांसपिंडस्तोचदक्षिणपार्श्वकुक्षिगतोक्षुद्रांत्रं हस्वांत्रं वृक्कौहृदयसमीपस्थौमांसपिंडौ वस्तिर्मूत्राशयः पुरीषाधानपुरीषाशयः आमाशयोपक्वान्नस्थानंहृदयंहृत्पुंडरीकं स्थूलांत्रंगुदोदरंप्रसिद्धानि वाद्यान्गुदवलयादंतर्गुदवलयंयावत्स्तोचगुदोकोष्ठोकोष्ठेनामेरधःप्रदेशभवोत्रयंचप्राणायतनस्यविस्तारउक्तः पूर्वश्लोकेतुसंक्षेपः अतएवपूर्वश्लोकोक्तानांकेषांचिद्विहायाः पुनःप्राणायतनप्रपंचार्थमाह ॥ कनीनिकेचाक्षिकूटेशष्कुलीकर्णपत्रकौकर्णशंखौभ्रुवौदृष्टीभ्रुकुंदरे ॥१०४॥ वंक्षणौवृषणौवृद्धोभ्लोष्मसंघातिकोस्त्रियौ ॥ उपजिह्विकास्फिजौवाहूजंघोरुषुचपिंडिका ॥१०५॥ तालहरंवस्तिशीर्षंचिबुकंगलमुंडिकाश्चदशैवमेतानिस्थानान्यत्रशरीरके ॥१०६॥ अक्षिकर्णाचतुष्कंचयच्चस्रङ्नासिकाद्वयानिच ॥ नवछिद्राणिनान्येवप्राणस्यायतनानितु ॥१००॥ कनीनिकेअक्षितारोअक्षिकूटेअक्षिनाशयोःसंधीशष्कुलीकर्णौशष्कुलीकर्णपत्रकौकर्णपल्यौकर्णौप्रसिद्धौ भ्रुवावेस्त्रियांतपाल्यौभ्रुष्टीप्रसिद्धौ ककुंदरेजघनकूपकौवंक्षणौजघनोरुसंधी

दक्षोपरिवर्तिकौ। स्तनौचक्लेष्मसंघातजौउपजिह्विका। घंटिका स्फिजौकटिप्रोथौ। जंघोरुषुचपिंडिका। तंघयोरूर्वोश्चपिंडिका। मांस
लप्रदेशः। गलशुंडिके। हनुमस्तकगलयोः संधी। शीर्षं शिरः। अवटः शरीरयः कश्चननिम्नोदेशः [redacted]
[redacted] कंठमूलकक्षाहित्रअवटोरितिपाठेकुकाटिका। तथाश्रोणीः कनीनिकयोंः प्र
येकंचेतंपार्श्वद्वयमितिवर्णाचतुष्टयं। यच्चास्फिगुदंचतुष्टयंशेषंप्रसिद्धमेवमेतानिकुत्सितेशरीरस्थानानि। तथास्फि
गुगलंकर्णयुग्मंनासाविवरद्वयमास्यंपायुपुरुषस्थमित्येतानिनवस्रोतांसिचप्राणास्यायतनान्येव। किंच॥ शिराःशतानि
सप्तैवनवस्नायुशतानिच॥ धमनीनांशतेद्वेतुपंचयेशीशतानिच॥१०२॥ शिराभिसंबद्धाःचत्वारिंशत्संख्यावातपित्तश्लेष्म
वाहिन्यासकलकलेवरव्यापिन्योनानाशाखाःसप्तशतसंख्याभवंतितथांगप्रत्यंगसंधिबंधनाःस्नायवोनवश
तानिधमन्योनामनाभेरूर्द्धताश्चतुर्विंशतिसंख्याःप्राणाहिवायुवाहिन्यःशाखाभेदेननवशतंभवंति। येश्यःपुनर्मांसला
कारुरुपिंडिकावंगप्रत्यंगसंबंधिन्यःपंचशतानिभवंति [redacted]
[redacted] पुनश्चासामेवशिराहीनांशाखांप्राचुर्यंपरिसंख्यांतरमाह॥ एकोनत्रिंशन्नाडीशतानितथानवशतानिच। षट्
पंचाशच्चजानीतशिराधमनिसंज्ञिता॥१०३॥ शिराधमन्योमिलिताःशाखोपशाखाभेदेननवविंशतिलक्षाणि। तथा एम
नवशतानिचाषट्पंचाशच्चभवंतीत्येवंहेसामश्रवःप्रभृतयोमुनयोजानीताः। किंच॥ त्रयोलक्षास्त्रिविज्ञेयाःस्नायूनांकेशः ३६
शिरसां॥ सप्तोत्तरंमर्मशतंद्वेचसंधिशतेतथा॥१०३॥ शरीरिणांश्मश्रूणांकेशानामिलिताःसंतस्त्रयोलक्षाविज्ञेयाःममी

रोमराजयःपिप्पलकेशकराणिचस्थानंतेषांसप्तोत्तरंशतंविज्ञेयं। अस्थ्नांतुद्वेसंधिशतेस्नायुशिराहिसंधयःपुनरनेता
सकलशरीरसुषिरहिसंख्यामाह॥ रोम्णांकोट्यस्त्रपंचाशच्चतस्रःकोट्यश्चवच॥ सप्तषष्टिस्तथालक्षाःसार्धाःस्वेदव
हेनेःसह॥१०४॥ वायवीयैर्विगणयंतेविभक्ताःपरमाणवः। यद्यप्येकोनुवेदैषांभावानांचैवमंस्थितिः॥१०५॥ पूर्वोदितशिराकेशा
स्नहिताःनीरोमाणःपरमाणवःसूक्ष्मसूक्ष्मतररूपाभागाःस्वेदस्रवणासुषिरैःसहचतुःपंचाशत्कोट्यःतथासप्तोत्तरषष्टि
र्लक्षाः। सार्धाःपंचाशत्सहस्रसहिताःवायवीयैर्विभक्ताःपवनपरमाणुभिःपृथक्कृतोविगणयंतेएतच्चशास्त्रदृष्ट्याअ
भिहितंचक्षुरादिकरणपथगोचरत्वाभावादस्यार्थस्य। एवमतिगहनमर्थंशिराद्यवयवसंस्थानरूपंहेमुनयोभवतां
मध्येयःकश्चिदनुवेत्ति। सोपिमहाश्चर्यायोद्धिमतांश्रुतोयत्नतोवृद्धिमतांबोध्यभावमेस्थितिः॥ शारीरस्यादिय
रिमाणमाह॥ रसस्यनवविज्ञेयाजत्रोस्थ्नजलयोदशसैवतुपुरीषस्यरक्तस्याष्टौप्रकीर्त्तिता॥१०६॥ षट्श्लेष्मापंचपित्तं
वचत्वारोमूत्रएवच॥ वसात्रयोद्वेतुमेदोमज्ज्ञोर्द्वेतुमस्तके॥१०७॥ श्लेष्मौजसस्तावद्द्वेरेतसस्तावदेवतु स्त्रैयंतरस्थि
रंवर्ष्मणस्यमोक्षायकुर्यसौ॥१०८॥ सम्यक्परिणताहारसारोरसस्यपरिमाणंनवौजलयः। पार्थिवपरमाणुसंश्लेष
शनिमित्तस्यजत्रूर्ध्वस्यौजलयोदशविज्ञेयाःपुरीषस्यवर्चस्कस्यसप्तैव। रक्तस्यजाठरानलपरिपाकापादितलौहित्यस्यान्न
सारस्याष्टावंजलयःप्रकीर्त्तिताः। श्लेष्मणाःकफस्यषडंजलयः। पित्तस्येतिमंपंचमत्रयोष्मणःस्वचत्वारः। वसायामांस
स्नेहस्यत्रयः। मेदसोमोसरस्यद्वावंजलौ। मज्जात्वस्थिसुषिरगतस्यैकोंजलिः। मस्तकेपुनरर्द्धांजलिर्मज्ञा। श्लेष्मो

ऽसृग्श्लेष्मसारस्यप्तधारेत सञ्चरमधातोस्त्वावहेवाङ्गजलिरेवाण्तच्चसमधातुपुरुषाभिप्रायेणोक्तंविषमधातोस्त्कनतियमः
वेलक्षणयाछरीरणा मस्छ यित्वा नर्थैवचाहोषधातुमत्तानांचयंप्रापांनविद्धतेऽत्यायुर्वेदस्मरणात्। इतीदृशमस्थि
स्नायाधारस्नेमतदशुचिनिधानंवर्ष्मास्थिरमितियस्यबुद्धिरसोकृतीपंडितोमोक्षायसमर्थोभवेदितिवैराग्यनि
त्यानित्यविवेकयोर्मोक्षोपायत्वात्। अस्थिमत्रपरीक्षादिप्राचुर्यज्ञानस्यवैराग्यहेतुत्वात्॥ ॥अत्रश्लोकव्याख्या॥ ॥
॥सर्वाःशुचिनिधानस्यकृतघ्नस्यविनाशिनः।शरीरकस्यापिकृतेमूढाःपापानिकुर्वतेयद्हिनामास्यकायस्ययदंतस्त
द्वर्हिभवेत्। इंडमाहायलोकोयंपुनःकाकाश्ववारयेदितितस्मादीदृशकुत्सितशरीरस्यास्थैर्यकविनिवृत्यर्थमात्मोपा
सनेप्रयतितव्यउपासनीयात्मस्वरूपमाह॥ द्वासप्तसिरहस्राणिशरीरेऽस्मिन्निःसृता॥ ॥हितानामाहिताना द्यस्तासां
मध्येशशिप्रभं॥१०९॥ मंडलंतस्यमध्यस्थआत्मादीपइवाचलः॥सतेयस्तंविदित्वेहपुनर्जायतेनरः॥११०॥हृदयप्र
देशादभिनिःसृताःकरंडकुसुमकेसरवत्सर्वतोनिर्गताहिताहितकरत्वेनहिताहितसंज्ञाद्वासप्ततिसहस्राणिनाड्यो भवं
ति। अयंतासांनाड्यानाद्यस्तासामिडापिंगलाख्येद्वेनाड्यौसव्यदक्षिणपार्श्वगतेहृदिविपर्यस्तेनासाविवरसंबद्धेप्राणापा
नायतने। सुषुम्नाख्यापुनस्तृतीयाइंडवन्मध्येब्रह्मरंध्रविनिर्गतातासांनाडीनांमध्येमंडलंचंद्रप्रभंतस्मिन्नात्मानिवातस्थ एम
दीपइवाचलःप्रकाशमानश्चास्ते। सएवंभूतोज्ञातव्यायतस्तत्साक्षात्करणाद्धिसंसारेनपुनःसंसरत्यमृतत्वंचप्राप्नोति॥ ॥ ३१
किंचतेयंचारण्यकमहंयदाहित्यादिवाक्यानां॥वेदशास्त्रंचमत्तोऽन्यत्तेयंयोगमभीप्सता॥१११॥चित्तस्यनेर्विषयांतरनिरस्कारे

न्न मात्माचतस्मिन्नजगतिकश्चिन्नित्यंनरस्तस्यादिशरीरंभवतीत्येतस्मिन्नर्थेविमुह्यामः। अतोमोहापनुत्यर्थं
मस्माकंविलयोवदत्च॥एवंमुनिभिरुक्तःप्रत्युत्तरमाह॥ मोहजालमपास्येहपुरुषादृश्यतेहियः॥सहस्रकरपत्रे
त्रःसूर्यवर्चाःसहस्रकः।सत्रआत्माचैवयत्तश्चविश्वरूपःप्रजापतिः।विराजःसोन्नरूपेणायत्तत्वमुपगच्छति॥१२॥
इहजगतियद्दृश्यंस्थूलकलेवरंतावन्नात्मन्यात्माभिमाननरूपंमोहजालंतदपास्यतद्व्यतिरिक्तोयपुरुषोनेककरचर
णालोचनःसूर्यवर्चाअनंतरश्मिःसहस्रकःबहुशिरादृश्यते। एतच्चतन्नेत्रोचरशास्त्राधारतोवगम्यतेतत्प्रसाक्षात्काराद्हि
हिसंबंधाभावात्। सएवआत्मायतःप्रजापतिश्चायतोसौविश्वरूपसर्वात्मकःवैश्वरूपमेवकृत्स्नमभिनिर्वर्तयति। यस्माद्सौ
विराजःपुरोडाशाद्यन्नरूपेणायत्तत्वमुपगच्छति। यतश्चदृष्टस्माद्द्वारेणप्रजासृष्टिरित्येवंवैश्वरूप्यं। एतदेवप्रपंच
यति।। योऽन्यदेवतात्यागसंभ्रमेणसउत्तमः।देवान्सतर्पयत्यग्नौयजमानेफलेनवै॥११३॥संयोज्यवायुनासोमंनीय
तेऽग्निभिरुत्तमैः॥ऋग्यजुःसामविहितंसोरंध्रामोपनीयते॥११४॥स्वमंडलाद्दृश्यःसूर्यःस्रजत्यमृतमुत्तमं॥यज्ञान्नसर्वभू
तानामशनात्तशनात्मनां॥११५॥तस्मिन्नात्युत्तरयतःपुनरन्नंपुनःक्रतुः॥एवमेतद्घटंनेवचक्रंसंपरिवर्तते॥११६॥ऊ
ष्मणश्चपुरोडाशाद्देवतोद्देशतस्त्यागात्तयोरसोदृष्टरूपमात्मनःपरिणामेत्यंतरमुत्तमः सकलजगज्जन्मबीजतयोक्त
ष्टतमःसंभूतःसदेवान्संप्रहर्तुंकारकमूलान्सम्यक्प्रीणयित्वायजमानंचाभिलषितफलेनसंयोज्यपवनेनप्रेर्य
मानश्चंद्रमंडलंप्रतिनीयते। ततःशशिमंडलाद्रश्मिभिर्भानुमंडलंसेषान्नघेवविघातपतीत्यभेदाभिधानाद्रश्य

जुसाममयंप्रत्यक्षनीयतोऽतस्वमंडलात्सोसूर्योऽमरनरसंदृष्टिरूपमुन्मंथयत्सकलभूतानामशनाद्यशनात्मनांचाव
रणांजननिमित्तंतत्रजंतितस्माद्दृष्टिसंपादितौषधिमयात्मजोत्पत्तिहेतोरन्नास्युनर्यज्ञोयताश्चपूर्वोभिहितभंगपा
तेनक्रमेणात्मनःसकाशाद्दखिलजगद्दृत्पत्तिस्तत्रचात्मनःस्वकर्मानुरूपविग्रहपरिग्रहः॥ ॥ननुयद्यात्मनःस
र्वकर्मजः॥१२६॥यद्यथात्मनोनादिस्वात्संभूतिर्नविद्यतेऽतरात्मनः।शरीरव्यापिनसाद्यापिपुरुषःशरीरंगमवा
प्तीभवतिभोगायतनंसुखदुःखात्मकंभोग्यजातमुपभुंक्तइत्येवंभूतेनसंबंधेनसंबंधीभवत्येवासचसमवायोमो
क्षेच्छद्वेषजनितकर्मनिरोधोयोनतुनिसर्गजातःतस्यकार्यत्वेनविनाशोपपत्तेर्नानिर्मुक्तिः॥ ॥आत्मनोऽगजः
मेत्यत्रकंतत्पंचयितुमाह॥सहस्रात्मामयायावन्मादृश्येवदुरात्मनः॥सुखवाकनुपज्ञोस्यसत्यवाग्यथाक्रमं॥१२७॥
पृथिवीपादतस्तस्यशिरसोद्यौरजायत॥मनःप्राणादिशःश्रोत्रात्स्यशाद्वायुमुखाच्छिखी॥१२८॥मनसश्चंद्रमाजा
तःश्वक्षुषश्चक्षुषश्चदिवाकरः॥तद्यनाहंनत्वंचजगच्चसचराचरं॥१२९॥योसौसकलजीवात्मकतयाप्रपंचात्म
कतयाचसहस्रात्मावदुरूपस्तथासकलजगद्वपुतयाद्रष्टेवोमयायुष्माकमुद्दाहृतस्तस्यवदनभुजसक्थिचरणाज्ञा
तायथाक्रममयजन्मास्यश्चत्वारोवर्णास्तथातस्यपादाद्भूमिर्मस्तकात्सुरसद्यद्यौर्नाभेराकाशःकुक्षेःकुंभःस्यशीत्य

वनोवधरनाद्भुतवहोमनसःशशांकोनेत्राद्भानुर्जथनाद्गगनंजंघमाद्भंगमात्मकंजगच्चात्रचोद्यंति॥यद्येवंसक
लंतत्रस्तत्पयोनिषुजायते॥ईश्वरःसकर्यमावैरनिष्टैःसंप्रयुज्यते॥१३०॥हिब्रह्मस्थागीश्वरायद्यात्मवज्जीवात्तस्माद्दिहः
शकुत्सितशरीरस्थायंतिकविनिवृत्त्यर्थमात्मोपासनेप्रयतितव्यं॥उपासनीयात्मस्वरूपमाह॥द्वासुपर्णासयु
क्तासखायासमानंवृक्षंपरिषस्वजाते॥तयोरन्यःपिप्पलंस्वाद्वत्त्यनश्नन्नन्योभिचाकशीति॥१३१॥मंडलंतस्यमध्यस्थ
मात्मानंपरिपश्यति॥सहस्रेयंविनिश्चित्यपुनर्जायतेनरः॥१३२॥हृदयंपद्मशाकाभिनिःसृताःकंदवत्सुमके॥सर्वत्सर्वतोनिर्ग
ताहिनाहितकरत्वेनहिताहितसंज्ञाघासहांतिसहस्रशोनाड्योभवंति॥अथरात्रिरूपाणांप्रसादाभिडापिंगला
ख्येद्वेनाड्यौसव्यदक्षिणपार्श्वगतेहृदिविपर्ययेणनासाविवरसंबद्धेप्राणापानायतनेसुषुम्नाख्यापुनरन्यतीय
हृदयमध्येब्रह्मरंध्रविनिर्गतानानाडीनांमध्येमंडलंचंद्रप्रभंतस्मिन्नात्मानिवातस्यहीपरंवाचलनःप्रकाश
मानआस्ते॥सएवंभूतोज्ञातव्योयतस्तत्साक्षात्कारेणहिसंसारेनपुनःसंसरत्यमृतत्वंचप्राप्नोति॥ ॥किंच
हियंचारण्यकमहंयहस्त्यश्वसवान्॥वेदशास्त्रंचहिभावंभजतेतर्हिकथमसौपायोनिषुसगपक्ष्यादि
षुतायतेऽथमोहरागद्वेषादिदोषदुष्टत्वात्॥तत्रजन्मत्यक्ष्यतेतिचेन्नायस्मादसावीश्वरः॥श्रुतंत्रःकथमनिष्टै
र्मोहरागादिभावैःसंप्रयुज्यते॥ ॥किंच॥ ॥करोतिबन्धितस्यास्यपूर्वज्ञानंकथंचनवेत्तिसर्वगोकस्मात्सर्वग
श्चनवेत्तिनो॥१३३॥तथेदमप्यत्रदूषणंमनःप्रभृतिहानोपायैःसहितस्यापितस्यात्मनःपूर्वज्ञानंजन्मांतरानु

भि प्र
३९

भूतविषयं कस्मान्नोत्पद्यते। तथा सर्वप्राणिगतां वेदनां सुखादिरूपां स्वयं सर्वगोपि सर्वदेहागतोपि कस्मान्न वेत्ति। त
न्न वेत्ति। तस्मादात्मैवेश्वरो जीवादिभावं भजत इत्ययुक्तं॥ अत्र पूर्ववोद्यसौ नरमाह॥ अंत्यपक्षिस्थावरतां मनोवाक्का
यकर्मजैः॥ दोषैः प्रयाति जीवोयं भवं योनिशतेषु च॥१३२॥ यद्यपीश्वरः स्वरूपेण सत्यज्ञानादनलक्षणस्तथाप्यवि
द्यासमावेशवशात् मोहरागादिभावैः। अभिभूयमानो नानाहीनयोनिजननसाधनं मानसादित्रिविधं कर्मनि
चयमाचरति तेन चांत्यादिहीनयोनितामापद्यते। अंत्याश्चांडालादयः। पक्षिणः काकादयः स्थावरा वृक्षादयः तेषां
भावोंत्यपक्षिस्थावरतां तां यथाक्रमेण मनोवाक्कायारब्धदोषैर्जन्मसहस्रेष्वथ यं जीवः प्राप्नोति किंच॥ अनंताश्च
यथाभावाः शरीरेषु शरीरिणां॥ रूपाण्यपि तथैवेह सर्वयोनिषु देहिनां॥१३३॥ शरीरिणां जीवानां शारीरेच्छुभा
वा अभिप्रायविशेषाः। सत्त्वाद्युद्रेकतारतम्याद्यथानंतास्तथा तत्कार्याण्यपि रूपाणि कुजचामनत्वादीनि दे
हिनां सर्वयोनिषु भवंति। ननु यदि कर्मजन्यानि कुजत्वादीनि तर्हि कर्मानंतरमेव तैर्भवितव्यमित्याशंक्याह। विपा
कः कर्मणां प्रेत्य केषांचिदिह जायते॥ इह वा मुत्र वै केषांभावस्तत्र प्रयोजनं॥१३४॥ केषांचित् ज्योतिष्टोमादिकर्म
णां विपाकः फलं प्रेत्य देहांतरे भवति केषांचित् कारीर्यादिकर्मणां वृष्ट्यादिफलमिहैव भवति। केषांचिच्चित्रादीनां
फलं पश्वादिकमिह देहांतरे चेत्यनियंतं॥ न ह्यनंतरमेव कर्मफलेन। भवितव्यमिति शास्त्रार्थः। अत्र च कर्मणां शुभा
शुभफलजनकत्वे सत्त्वादिभाव एव प्रयोजकभूतस्तदापक्षत्वात्फलतारतम्यस्य॥ मनोवाक्कायकर्मजैरंत्यादियोनितां

एम
३९

प्राप्नोमीत्युक्तं तत्प्रपंचयितुमाह परद्रव्याण्यभिध्यायंस्तथानिष्टानि चिंतयन्। वितथाभिनिवेशी च जायतेंत्यसुयोनिषु॥१३५॥
परधनानि कथमहमपहरेयमित्याभिमुख्येन ध्यायंस्तथाऽनिष्टानि ब्रह्महत्यादीनि हिंसात्मकानि करिष्यामीति चिंत
यन् वितथे असत्यभूते वस्तुनि अभिनिवेशः पुनः संकल्पस्तद्वांश्चांडालाद्यंत्ययोनिषु जायते। किंच॥ पुरुषोनृतवा
दी च पिशुनः पुरुषस्तथा॥ अनिबद्धप्रलापी च मृगपक्षिषु जायते॥१३६॥ यस्तु अनृतवदनशीलः पुरुषः। पिशुनः कर्णे
जपः पुरुषः परोद्वेगकरभाषी। अनिबद्धप्रलापी प्रकृताऽसंगतार्थवादी च। बुद्धिपूर्वाऽनृतादितारतम्यात् हीमोत्कृष्टे
षु मृगपक्षिषु जायते। किंच॥ अदत्तादाननिरतः परदारोपसेवकः॥ हिंसकश्चाऽविधानेन स्थावरेष्वभिजायते॥१३७॥
अदत्तपरधनापहारप्रसक्तः परदारप्रसक्तश्चाऽविधानेन स्थावरेष्वहितमार्गेण प्राणिनां घातकश्च दोषगुरुलघुभा
वतारतम्यात् तरुलताप्रतानादिस्थावरेषु च जायते॥ सत्त्वादिगुणपरिपाकमाह॥ आत्मज्ञः शौचवान् दांतस्तपस्वी विः
जितेंद्रियः। धर्मकृद्वेदविद्याति सात्त्विको देवयोनितां॥१३८॥ आत्मज्ञो विद्याधनकुलीनाद्यभिमानरहितः। शौचवा
न् बाह्याभ्यंतरशौचयुक्तः। दांतः उपशमान्वितः। तपस्वी कृच्छ्रादितपोयुक्तः। तथेंद्रियार्थेष्वप्रसक्तो नित्यनैमित्तिकः
धर्मानुष्ठाननिरतो वेदार्थवेदी च यः स सात्त्विकः स च सत्त्वोद्रेकतारतम्यवशादुत्कृष्टोत्कृष्टतरसुरयोनिं वा प्राप्नोति। किं
च॥ असत्कार्यरतो धीर आरंभी विषयी च यः॥ स राजसे मनुष्येषु मृतो जन्माधिगच्छति॥१३९॥ असत्कार्येषु तूर्यवा
दित्रनृत्यादिष्वभिरतो यस्तथा व्यग्रचित्तः सदा कार्याकुलो विषयेष्वतिप्रसक्तश्च। स रजोगुणयुक्तस्तद्गुणतारतम्या

मि व्या
५०

द्धीनोकृष्टमनुष्यजातिष्टमरणानंतरमुत्पत्तिंप्राप्नोतितथानिद्रालुःक्रूरकृल्लुब्धोनास्तिकोयाचकस्तथा॥प्रमादवान्
भिन्नवृत्तोभवेतिर्यक्षुतामस॥१४०॥यःपुनर्निद्राशीलःप्राणिपीडाकरोलोभयुक्तश्चतथनास्तिकोधर्मादेर्निंदको
याचनशीलप्रमादवान्कार्याकार्यविवेकशून्योविरुद्धाचारश्चासौतमोगुणयुक्तस्तारतम्याद्धीनहीनतरपश्वा
दियोनिषुजायते॥ ॥फर्वोक्तमुपसंहरति॥ ॥रजसातमसाचैवंसमाविष्टोभ्रमन्निह॥भावैरनिष्टैःसंयुक्तःसंसारं
प्रतिपद्यते॥१४१॥एवमविद्याविद्योयमात्मारजस्तमोभ्यांसम्यगाविष्टइहसंसारेपर्यटन्नानाविधदुःखप्रदैर्भावैरभिभू
तःपुनःपुनःसंसारंदेहग्रहणंप्राप्नोति।इतीश्वरःसकथंभावैरनिष्टैःसंप्रयुज्यतइत्यस्यचोद्यस्यानवकाशः।यदपिकरणै
रन्वितस्यापिइतीश्वरःसकथंभावैरद्वितीयंचोद्यंतस्योत्तरमाह॥मलिनोहियथादर्शोरूपालोकस्यनक्षमः॥तथाऽवि
पक्वकरणआत्माज्ञानस्यनक्षमः॥१४२॥यद्यपिआत्मांतःकरणादिज्ञानसाधनसंपन्नस्तथापिजन्मांतरानुभूतार्थाव
बोधोनसमर्थःअविपक्वकरणोरागादिमलाक्रांतचित्तोयस्माद्यथादर्पणोमलच्छन्नोरूपज्ञानोत्पादनसमर्थोन
भवति।ननुप्राग्भवीयज्ञानस्याप्यात्मप्रकाशत्वात्तस्यचस्वतःसिद्धत्वान्नाऽनुपलंभोयुक्तइत्याशंक्याह॥कद्वे
र्वारौयथाऽपक्वेमधुरःसन्नसोपिन॥प्राप्यतेचात्मनितथानापक्वकरणोज्ञता॥१४३॥अपक्वेकद्वेर्वारौतिकक
र्कटिकायांविद्यमानोपिमधुरोरसोयथानोपलभ्यतेतथात्मन्यपक्वकरणेविद्यमानापिज्ञाताऽज्ञातृतांप्राग्भवीयवस्तुगोचरोन
प्राप्यते।वेत्तिसर्वगतांकस्मात्सर्वगोपिनवेदनाभितिनदुक्तंतत्रोत्तरमाह॥ ॥सर्वाश्रयोनिजेदेहेहीविंदतिवेदनां॥योगीमुक्तश्च

राम
५०

सर्वासांयोनचाप्नोतिवेदनां॥१४४॥यःपुनर्देहीदेहाभिमानयुक्तःससर्वश्रियांसाध्यात्मिकादिरूपांवेदनांस्वकर्मोपार्जितएवदे
हेप्राप्नोति।नदेहांतरगतांभोगायतनारंभादृष्टवैलक्षण्यादेव।यस्तुयोगीमुक्तोमुक्ताहंकारादिःससकलक्षेत्रज्ञगनानांसुखदु
खादिसंविदांवेदिताभवति।परिपक्वकरणत्वात्।नन्वेकस्मिन्नात्मनिसुरनरादिदेहेषुभेदप्रत्ययोनघटतइत्याशंक्याह
॥आकाशमेकमेवगगनंकूपकुंभाद्युपाधिभेदभिन्नंनानानुभूयते।यथावाभानुरेकोपिभिन्नेषुजलभाजनेषुकरकमणि
कमल्लिकादिषुनानेवानुभूयते।तथैकोप्यात्मांतःकरणोपाधिभेदेननानाप्रतीयते।द्वितीयदृष्टांतोपादानमात्मभेदस्या
ऽपारमार्थिकत्वद्योतनार्थं॥ ॥पंचधातून्स्वयंषष्ठआदत्तेयुगपत्प्रभुरित्याद्युक्तमर्थमुपसंहृत्याह॥ ॥ब्रह्मस्वानिलते
जांसिजलंभूश्चेतिधातवः॥इमेलोकाएषचात्मातस्माच्चसचराचरं॥१४६॥ब्रह्मआत्मा।स्वंगगनमनिलोवायुस्तेजोग्निर्ज
लंप्रसिद्धंभूश्चेत्येतेवातादिधातवइवशरीरंव्याप्यधारयंतीतिधातवोभिधीयंतेतत्रस्वादयपंचधातवोलोक्यंते
दृश्यंतइतिलोकाजडाइतियावत्॥एवंचिद्धातुरात्मा।एतस्माज्जडाजडसमुदायात्स्थावरजंगमात्मकंसर्वंजगदुत्पद्य
तेकथमसावात्माजगत्॥सृजतीत्यतआह॥मृद्दंडचक्रसेयोगात्कुंभकारोयथाघटं॥करोतितृपामृत्काष्ठैर्गृहंवागृहका
रकः॥१४७॥हेममात्रमुपादायरूपंवाहेमकारकः॥निजलालासमायोगात्कौशंवाकोशकारकः॥१४८॥करणान्येवमादा
यतासुतास्विहयोनिषु॥सृजत्यात्मानमात्माचसंभूयकरणानिच॥१४९॥यथाहिकुलालोभृच्चक्रचीवरादिकंकरणजा
तामुपादायकरकशरावादिकंनानाविधंकार्यजातंरचयति।यथावा।वर्द्धकिस्तृपामृत्काष्ठैःपरस्परसाक्षेपैरेकंगृहाख्यं

कार्यकरोतिः। यथावाहेप्रकारकः स्वर्णाकारकःकेवलेहेमोपादायहेमानुगतमेवकारकमुकुरकुंडलादिकार्यमुत्पादयतीय
थावाकोशकारकः कीटविशेषानिजनालयारचनामात्रबंधनंकोशाख्यमारभते। तथात्मापिपृथिव्यादीनिसाधनानियत्
स्यसापेक्षाणितथाकरणानिचक्षुरादीन्युपादायास्मिन्संसारेतामुतामुतादियोनिषुस्वयमेवात्मानंनिजकर्मबंधवद्ध
शरीरितयासृजति॥ ॥किंपुनर्यथाधिकृतानींद्रियव्यतिरिक्तात्मसद्भावेप्रमाणमित्याशंक्याह॥ महाभूतानिमत्स्यानिवधात्मापित
थेवाह॥ कोन्यथैकेननेत्रेणादृष्टमन्येनपश्यति॥१५०॥ वाचंवाकोविजानातिपुनःसेऽक्षयसंस्कृतं॥ यथाहिपृथिव्यादिमहा
भूतानिमत्स्यानिप्रमाणागम्यत्वात्तथात्मापिमत्स्यो। यस्मात्तत्रान्यथार्थादिबुद्धींद्रियव्यतिरिक्तोज्ञाताअक्रोतानास्तद्धर्मेकनच
क्षुरिंद्रियेणादृष्टंरूपंमनस्यतींद्रियेनकोविजानाति। यमहमद्राक्षंतमहंस्पर्शामीति। तथाकस्यचित्पुरुषस्यवाचंपरंवक्ष्य
त्तापुनरक्षयमाणांवाचंतस्यवागियमितिकःप्रत्यभिज्ञानाति। तस्मात्तज्ञानेंद्रियातिरिक्तोज्ञाताअक्रोवर्तति प्रसिद्धं॥ किंच॥ अती
तार्थःस्मृतिःकस्यकोवास्वप्नस्यकोरकाप॥ जातिरूपवयोज्ञानविद्ययाभिरहंकृतः। शब्दादिविषयोद्योगंकरोतिमनसागिरा
॥१५२॥ यद्यात्माअक्रोवर्तनस्यात्तर्ह्यनुभूतार्थगोचरास्मृतिः। एवंनानुभवभावितसंस्कारोबोधविनोपपद्यते॥ तथाकः स्वप्नतानस्यकारकः। नहींद्रियाणांउपरतव्यापारा णम
णांतत्कारकत्वंतथाहेमवास्त्रिजनत्वादिसंपन्नइत्येवंविधोऽनुसंधानप्रत्ययःकस्यभवतिस्थिरात्मव्यतिरिक्तस्य। तथाश ३८
ब्दस्पर्शादिविषयोपभोगसिध्यर्थमुद्योगमनोवाक्कायैःकःकुर्यात्। तस्मादयंबुद्धींद्रियव्यतिरिक्तआत्मास्थित॥ ॥उपा

सनादिशेषविध्यर्थंसंसारस्वरूपंविवृण्वन्नाह॥ समंदिग्धमतिःकर्मफलमस्तिनवेतिवा॥ विच्छिन्नःसिद्धमात्मानमसि
द्धेपिहिमन्यते॥१५३॥ योमोपूर्वोक्तआत्माविच्छिन्नाहंकारयुक्तःससकलकर्मसुफलमस्तिनवेतिसंदिग्धमतिर्भवति।
र्भवति। तथासिद्धोप्यकृतार्थोपिसिद्धमिवकृतार्थमिवात्मानमन्यतेकिंच॥ ममाहंगतामात्याग्रहमेषामित्यस्थिरमतिः
:हिताहितेषुभावेषुविपरीतमतिःसदा॥१५४॥ तस्यविच्छिन्नमेतन्ममकलत्रपुत्रप्रेव्यादयोत्रहमेषामित्यतीवममता
कुलास्थितिर्भवति॥ तथाहिताहितकरेकार्यप्रकारेसंविच्छिन्नमतिर्विपरीतमतिःसदाभवेत्॥ किंच॥ तेयंतेप्रकृतो
वैवविकारेचाविशेषवान्॥ अनोशकानलापातज्ज्वलप्रपतनोद्यमी॥१५५॥ एवंहतोगवनीतात्मावितथाभिनिवेश
वान्॥ कर्मणाद्वेषमोहभ्यांरुच्छयाचैवबध्यते॥१५६॥ तेयंजानातीतितेयंतस्मिन्नात्मनिप्रकृतोचात्मनोगुणासाम्या
वस्थायांविकारेचाहंकारावविशेषवान्। विवेकानभिज्ञोभवति। तथोऽनशनहुताशनांबुप्रवेशनादिषुविप्लव
वशात्कृतप्रयत्नोभवेद्रंजनाप्रकारकार्यप्रवृत्तोऽविनीतात्मात्रसत्कार्यप्रतिनिवेशयुक्तः। सतत्कृतकर्मजाते
नारागद्वेषाभ्यांमोहेनचबध्यते। शरीरयहणाद्योगाः॥ कथंपुनरस्यविघ्नोभवतीत्यतआह॥ आचार्योपासनं
वेदशास्त्रार्थेषुविवेकिता॥ तत्कर्मणामनघानांसंगःसद्भिर्गिरःशुभाः॥१५७॥ आलोकालंभचिगमःसर्वेभूतात्मद
र्शनं॥ त्यागःपरिग्रहाणांचस्त्रीणांकाषायधारणं॥१५८॥ विषयेंद्रियसंरोधस्तत्प्रयत्नस्यविवर्जनं॥ शरीरपरिसंख्या
नंप्रव्रज्याविधदर्शनं॥१५९॥ नीरजस्कमतासत्वशुद्धिनिःस्पृहताशमः॥ एतेरूपायेःसंशुद्धःसत्वयोग्यमनीभवेत्

॥१६०॥ विद्यार्थमाचार्यसेवा। वेदांतार्थेषु। पातंजलादियोगशास्त्रार्थेषु च विवेकित्वं तत्प्रतिपादितध्यानादिकर्मणामनु
ष्ठानं सत्पुरुषप्रसंगः। प्रियहितवचनत्वं ललनालोकनालंभयोः परित्यागः। सर्वभूतेष्वात्मवद्दर्शनं समत्वदर्शनं प
रिग्रहाणां च पुत्रक्षेत्रकलत्रादीनां त्यागो जीर्णकाषायधारणं तथा शब्दस्पर्शादिविषयेषु श्रोत्रादींद्रियाणां प्रवृत्ति
निरोधं स्तंद्रीनिद्रानुसारिणी आलस्यमनुत्साहस्तयोर्विशेषेण त्यागः। शरीरकस्य परिसंख्यानमच्छिराशुचित्वादि
दोषानुसंधानं। तथा सकलगमनादिषु प्रवृत्तिषु सूक्ष्मप्राणिवधादिदोषपरामर्शस्तथा रजस्तमोविध्वंसता। प्राणाया
मादिभिर्भावशुद्धिः। निःस्पृहता विषयेष्वनभिलाषः। शमो बाह्यांतःकरणसंयमः। एतैराचार्योपासनादिभिरुपायै
ः सम्यक्शुद्धः केवलसत्वयुक्तो ब्रह्मोपासनेनामृतीभवेन्मुक्तो भवति कथममृतत्वप्राप्तिरित आह॥ तत्वस्मृतेरुप
स्थानात्सत्वयोगात्परिक्षयात्कर्मणामन्निकर्षाच्च सतां योगः प्रवर्तते॥१६१॥ आत्माख्यतत्वस्मृतेरात्मनि निश्चल
तयोपस्थानात्सत्वशुद्धियोगात्केवलसत्वगुणयोगात्कर्मबीजानां परिक्षयात्सत्पुरुषाणां च संबंधादात्मयोगः प्र
वर्तते॥ किंच॥ शरीरसंक्षये यस्य मनः सत्वस्थमीश्वरं॥ अविप्लुतमतिः सम्यक्स जातिस्मरतामियात्॥१६२॥ यस्य
पुनर्योगिनोऽविप्लुतमतेः शरीरसंक्षयसमये मनः सत्वयुक्तं सम्यगेकाग्रतयेश्वरप्रतिव्याप्रियते स यद्युपासनाऽ
प्रयोगाऽप्रवीणपालत्मानं नाधिगच्छति। तर्हि विशिष्टसंस्कारपाटववसेन जात्यंतरानुभूतक्रिमिकीटादिनानागर्भवा
सादिसमुद्भूतदुःखस्मरत्वं प्रक्रियात्स्मरपो न च जातोद्वेगस्तद्विक्षेदकारिणि मोक्षे प्रवर्तते। यस्त्वपटुसंस्कारतया पूर्व

जातिं न स्मरति तस्य का गतिरित्याह॥ यथा हि भरतो वर्णैर्वर्णानत्यात्मनस्तनुं॥ नानारूपाणि कुर्वाणः स्तथात्मा क
र्मजास्तनूः॥१६३॥ भरतो नटः। स यथा रामरावणादिनानारूपाणि कुर्वाणः स्तथात्मा कर्मजः॥ सितासितपीता
दिभिर्वर्णैरात्मनस्तनुं वर्णयति तथैवात्मा तत्तत्कर्मफलोपभोगार्थं कुब्जवामनादिनानारूपाणि कर्मनिमित्तानि क
लेवरान्यादत्ते॥ किंच॥ कालकर्मात्मबीजानां दोषैर्मातुस्तथैव च॥ गर्भस्य वैकृतं दृष्टमंगहीनादिजन्मतः॥१६४॥ ज
न्मतः न केवलं कर्मैव कुब्जवामनत्वादिनिमित्तं किंतु कालकर्मणी स्वपितृकारणबीजदोषो मातृदोषश्चेति स
र्वमेतत्सहकारिकारणमेतेन दृष्टादृष्टरूपेण कारणकलापेन गर्भस्यांगहीनत्वादिविकारो जन्मत आरभ्या
नियतकालो दृष्टः। ननु प्राकृतिकः प्रलयावसरे महदाद्यखिलविकारविनाशे कर्मणां नाशात्कथं तन्निबंध
नः प्रथमपिंडपरिग्रह इत्याशंक्याह॥ अहंकारेण मनसा गत्या कर्मफलेन च॥ शरीरेण च नात्मायं मुक्तपूर्वे कथं
चन॥१६५॥ मनोहंकारौ प्रसिद्धौ। गतिः संसरणहेतुभूतो दोषाहेतुः। कर्मफलं धर्माधर्मरूपं। शरीरं लिंगात्मकं
। एतैरहंकारादिभिरयमात्मा कदाचिदपि न विमुच्यते मावन्मोक्षः। ननु प्रतिनियतकर्मणां जीवानां प्रतिनियतका
लमेवोपरितिर्युक्ता न पुनः संग्रामादौ युगपदकाले प्राणसंक्षय इत्याशंक्याह॥ वर्त्याधारस्नेहयोगाद्यथा दीपस्या
संस्थितिः॥ विक्रियापि च दृष्टैवमकाले प्राणसंक्षयः॥१६६॥ यथा हि खलु तैलक्लिन्नानेकवर्त्तिवार्त्तिनीनां नानाज्वा
लानां युगपत्स्थितिस्तासां च स्थितानां पटुतरं पोपूयमानपवनाहतिरूपविपक्षहेतूपनिपातयोगपद्याद्युग

प्रहपरतियथाभवति।तथैवरथिसारथिवाजिकुंजरादिशरीरानांयुद्धास्योपरतिहेतुर्योगपद्याद्कालेपिप्रापापूरिश्न
योनानुपपन्नः एतदुक्तं भवतिप्रतिनियतकालविपक्षिहेतुभूताऽदृष्टस्यतद्विरुद्धकार्यकरादृष्टहेतूपनिपातेतत्प्र
तिबंधइति।मोक्षमार्गमाह।।अनंतारमयस्तस्यदीपवद्यःस्थितोहृदि।।मिताभिताःकदुनीलाःकपिलायीतलो
हिता।।१६९।।ऊर्ध्वमेकस्थितस्तेषांयोभित्वास्तूर्यमंडलं।।ब्रह्मलोकमतिक्रम्यातेनयातिपरांगतिं।।१६२।।योसौहृदि
प्रदीपवत्स्थितोजीवस्तस्यानंतारमयोनाड्यः सुखदुःखहेतुभूताद्यासप्रतिसहस्राणीत्याहितोक्तेः।मिताभिन
कर्बुरनीलादिरूपाःसर्वतस्थितास्तेषामेकोरश्मिरूर्ध्वं व्यवस्थितोयोसोमार्गोऽमंडलंनिर्भिद्यहिरण्मयंमंडलं
चातिक्रम्यवर्तते तेनजीवःपरांगतिमपुनरावृत्तिलक्षणांप्राप्नोति।स्वर्गमार्गमाह।यस्तस्यान्यऽश्मिशतमूर्ध्वमे
वव्यवस्थितं।तेनऽर्ध्वशरीरांणिसधामानिप्रपद्यते।।१६३।।यस्तस्यात्मनोमुक्तिमार्गोभूतांतुरश्मेरन्यऽश्मिशतमू
र्ध्वंकारमेवव्यवस्थितंतेनसुरशरीरांणितेजसानिसुखैकभोगाधिकरणानिसधामानिकनकरत्नतरत्नरचिताम
रपुरवरसहितानिप्रपद्यते।संसरणमार्गमाह।।येनैकपाश्वाश्वस्थाऽश्मयोरूक्मऽइत्रभाःहेहकर्मोपिभोगापते
संसरतिसोऽवशः।।१७०।।येपुनस्तस्याश्वस्थाऽश्मयोमऽइत्रभास्तैरिहफलोपभोगार्थंसंसारेसंसरतिनाऽवशःस्वक
र्मपरतंत्रः।मूर्तचैतन्यवादिपक्षंपरिजिहीर्षुराह।।वेदैःशास्त्रैःसविज्ञानैर्जन्मनामरणेनच।।आत्मगीत्यातथा
मत्यास्त्येनघ्नन्तेनच।।१७१।।श्रेयसासुखदुःखाभ्यांकर्मभिश्चशुभाशुभैः।निमित्तशाकुनज्ञानयहसंयोगजैःफलै

।।१७३।।तीरानक्षत्रसंधारैर्जागरैःस्वप्नजैरपि।।आकाशपवनज्योतिर्जलभूनिमिरैस्तथा।।१७३।।मन्वंतरैर्युगप्राप्तामंत्रौषधा
फलैरपि।।विज्ञात्मानंवेद्यमानंकारणांतरगंतथा।।१७४।।वेदैःसएषनेतिनेत्यात्मेतिश्रुस्छत्रमपान्वद्रस्वमपाणि
पादंक्यादिभिः।।शास्त्रैश्चमीमांसान्वीक्षिक्यादिभिः।।विज्ञानेश्चमममेदंशरीरमित्यादिहेयव्यतिरिक्तात्मरूपानुभवै
स्तथाजन्ममरणाभ्यांजन्मांतरानुष्ठितधर्माधर्मनियताभ्यांहेयव्यतिरिक्तात्मानुमानंआत्मर्त्विजन्मा।नरगतकः
र्मानुष्ठाननियततया।तथागमनागमनाभ्यांज्ञानेच्छाप्रयत्नाधारनियताभ्यांअपिमैक्रिकरेहेतिरिक्तात्मानुमा
नं।नहिरेहस्यचैतन्यादिसमवायःसंभवतियतःकारणगुणाप्रक्रमेणाकार्यद्रव्येवैशेषिकेगुणानंभरेषुनवत
कारणभूतपार्थिवपरमाणुषुचैतन्यादिसमवायःसंभवतितद्वारब्धस्यंभकुंभादौमौक्रिकेष्वनुषलंभात्।नचमरण
क्रियादुरदृष्टाद्विद्यांतरसंयोगजन्यतिवाच्यं।शक्तेःसाधारणगुणत्वात्।अतोमौक्रिकरेहेतिरिक्तश्चेतन्यादिसमवा
यीगीकर्तव्यः।सत्यान्यतेप्रसिद्धेश्चयोहितप्राप्तिः।सुखदुःखेऐहिकामुष्मिकेतथाशुभकर्मानुष्ठानसमशुभकर्मयुरि
त्याद्यतेप्रसिद्धेश्चयोहितगः।एतेश्चज्ञानेतियतेरेहेतिरिक्तात्मानुमानं।निमित्तमरकंपादि।शाकुनज्ञानंपिंगलादि
तत्रिचेष्टालिंगकंतज्ज्ञानंग्रहाःसूर्योऽस्यःतत्संयोगजैःफलैः।तारास्त्रश्विन्यादिव्यतिरिक्तानिऽयोंतीतिनक्षत्रान्यश्वयु
क्प्रभृतीनिएतेषांसंचारैःशुभाशुभफलद्योतनैर्जीवरागवत्स्थाजन्येश्चसच्छ्रद्रादित्यादिदर्शनैःतथास्वप्नजैः।स्वरव
रोहयुक्तरथारोहणादिज्ञानेनयथाकाशाद्यैश्चजीवोपभोगार्थंतयासृष्टैस्तथामंवंतरप्राप्तायुगाद्युगांतरप्राप्तायुगे

हेऽनुपपद्यमानया। तथा मंत्रौषधिफलैः। प्रेक्षापूर्वकैः क्षुद्रकर्माद्यैः साक्षात्परंपरया वा देहेनुपपद्यमानैः वेद्यमानं हे
मुनयो वित्तजानीता॥ किंच॥ अहंकारस्मृतिर्मेधा द्वेषो बुद्धिः सुखं धृतिः॥ इंद्रियांतरसंचार इच्छा धारणजीविते॥१७५॥
स्वर्गस्वप्नश्च भावानां प्रेरणं मनसो गतिः॥ निमेषश्चेतनायत्न आदानं पांचभौतिकं॥१७६॥ यत एतानि दृश्यंते लिं
गानि परमात्मनः॥ तस्मादस्ति परो देहादात्मा सर्वगईश्वरः॥१७७॥ अहंकृतिरहंकारः। स्मृतिः प्राग्भवीयानुभवभावि
यीनुभवभावितसंस्कारो देहादात्मा सर्वगईश्वरः धनिबंधनास्तन्यपानादिगोचरा। सुखमैहिकं। धृतिर्धैर्यमिंद्रियांत
रेणादृष्टेर्थे इंद्रियांतरस्य तत्संचारोयमहमद्राक्षं तमहं स्पृशामि इत्येवानुसंधानरूपइंद्रियांतरसंचारः। अत्रेच्छाप्रय
त्नचैतन्यानां स्वरूपेण लिंगत्वं पूर्वश्लोकेनुगमनसत्यवचनादिहेतुतयार्थिकं लिंगत्वमित्यपौनरुक्त्यं तिथाधारणं
शरीरस्य जीवितं प्राणधारणं। स्वर्गो नियतदेहांतरोपभोग्यः सुखविशेषः। स्वप्नः प्रसिद्धः। पूर्वश्लोके तु स्वप्नस्य शुभाशु
भफलद्योतनकतया लिंगत्वमत्र स्वरूपेणोत्पपौनरुक्त्यं। भावानामिंद्रियादीनां प्रेरणं मनसो गतिः चेतनाधिष्ठानव्या
प्ता। निमेषः प्रसिद्धः। तथा पंचभूतानामुपादानं यस्मादेतानि लिंगानि भूतेष्वनुपपन्नानि साक्षात्परंपरया वा परमा
त्मनो द्योतकानि दृश्यंते। तस्मादस्ति देहातिरिक्त आत्मा सर्वगईश्वर इति प्रसिद्धं। क्षेत्रस्वरूपमाह॥ बुद्धींद्रियाणि सा
र्थानि मनः कर्मेंद्रियाणि च॥ अहंकारश्च बुद्धिश्च पृथिव्यादीनि चैव हि॥१७८॥ अव्यक्तमात्मा क्षेत्रज्ञ क्षेत्रस्या
स्य निगद्यते॥ ईश्वरः सर्वभूतस्थः सन्नसत्सदसंश्चयः॥१७९॥ बुद्धींद्रियाणि श्रोत्रादीनि। सार्थानि शब्दादिविषयसहि

तानि। मनः कर्मेंद्रियाणि वागादीनि। तथाहंकारो बुद्धिश्च निश्चयात्मिका पृथिव्यादीनि पंचभूतानि अव्यक्तं प्रकृतिरि
त्येतत्क्षेत्रमस्य क्षेत्रस्य योसावीश्वरः। सर्वगतोऽत एव सत्सद्रूपः। प्रमाणांतराग्राह्यत्वादसन्नस्य छप्रतीतिकत्वात्स
दसद्रूपोसावात्मा क्षेत्रज्ञ इति निगद्यते। बुध्यादेरुत्पत्तिमाह॥ बुद्धेरुत्पत्तिरव्यक्तात्ततोहंकारसंभवः। तन्मात्रादीन्या
हंकारादेकोत्तरगुणानि च॥१८०॥ सत्वादिगुणसाम्यमव्यक्तं च। ततस्त्रिप्रकारायाः सत्वरजस्तमोमय्या बुद्धेरुत्पत्ति
स्तस्याश्च त्रैकारिकस्तैजसो भूतादिरिति त्रिविधोहंकार उच्यते। तन्मात्रादीनि शब्दादीनि तत्र तामसाद्भूतादिसंज्ञका
दहंकारात्तन्मात्राणि आदिग्रहणाद्गुणादीनि तानि चैकोत्तरगुणान्युत्पद्यंते। च शब्दाद्वैकारिकतैजसाभ्यां बुद्धिक
र्मेंद्रियाणां उत्पत्तिः। गुणस्वरूपमाह॥ शब्दस्पर्शश्च रूपं च रसो गंधश्च तद्गुणाः॥ यो यस्मान्निसृतश्चैषां स तस्मिन्नेव
लीयते॥१८१॥ तेषां गगनादिपंचभूतानां एकोत्तरदध्या पंचशब्दादयो गुणा वेदितव्याः। एषां बुध्यादिविकाराणां मध्ये
यो यस्मात्प्रकृत्यादेरुत्पन्नः स तस्मिन्नेव सूक्ष्मरूपेण प्रलयसमये प्रलीयते॥ प्रकरणार्थमुपसंहरन्नाह॥ यथात्मानं सृ
जत्यात्मा तथा वः कथितो मया। विपाकात्त्रिः प्रकाराणां कर्मणामीश्वरोपि सन्॥१८२॥ सत्वं रजस्तमश्चैव गुणास्तस्यैव की
र्तिताः। रजस्तमोभ्यामाविष्टश्चक्रवद्भ्राम्यते ह्यसौ॥१८३॥ अनादिरादिमांश्चैव स एव पुरुषः परः। लिंगेंद्रियग्राह्यरूपः स वि
कार उदाहृतः॥१८४॥ मानसादित्रिः प्रकारकर्मणां विपाकादीश्वरोपि सन्नात्मा यथात्मानं सृजति तथा युष्माकं कथि
तः। सत्वादयश्च गुणाः तस्यैवाऽविद्ययाविष्टस्य कीर्तिताः। तथा स एव रजस्तमोभ्यामाविष्टश्चक्रवदिह संसारे भ्राम्यतीः

त्यपि कथितं। सर्ववानाहिः। परमपुरुषः शरीरग्रहणानाहिमानकुब्जवामनत्वादिविकारसहितस्त्रीपुंस्त्वाद्यवस्थालोकाख्यापरिणामौलिंगेरिड्येष्वस्त्रीत्वाद्यवस्थाहेतुः। स्वर्गिमार्गेण अग्निहोत्रिणः स्वर्गकामाः स्वर्गं प्राप्नुवंति। किंच। येचज्ञानपरः सम्यगंभरणहेतुः। तथाष्टाभिरात्मगुणैरेयाक्षांत्रि+सम्यगष्टभिश्चगुणैर्युक्तः। तैपात्तेनैवमार्गेणास्त्यब्रतपरायणाः। १८६। येचज्ञानादिस्मार्तकर्मपरा नसत्यशौचमनायासोऽमंगलमकार्पण्यमस्पृहेतिगो तेमादिप्रतिपादितैर्युक्तास्तथायेचसत्यवस्त्रनिरतास्तेपितेनैवपितपानेनसुरसरनमाप्नुवंतिननुतेमिश्रिकाद्विप्रतिसंचरंस्विलाध्यापकप्रलयाश्चविहितवेदास्त्यक्तपरिचितज्ञानाः कथमिवाग्निहोत्रादिककर्मकरिष्यंतिकथंतेरंचाकृतकर्माणः। स्वर्गमार्गं प्रश्नेरोछरंतीत्यतघ्रीह। तत्राष्टाशीतिसाहस्रामुनयोगृहमेधिनः। पुनरावर्तिनोबीजभूताधर्मप्रवर्तकाः। १८७। तत्रापित्यानेऽष्टाशीतिसहस्रसंख्यामुनयोगृहेच्छाभिमाणः पुनरावृत्तिधर्माणः स्वर्गहेवैरस्योपदेशकृतयाधर्मतरुप्रादुर्भावेबीजभूताः संतोग्निहोत्रादिधर्मप्रवर्तकाः। अतोनप्रादुरितदोसमासंगः। किंच। सप्तर्षिनागवीथ्यंतरेवलोकसमाश्रिताः। तावंतएवमुनयर्वारंभविवर्जिताः। १८८। तपसाब्रह्मचर्येणपाराशर्यागमेनमधया। तत्रगत्वावतिष्ठंतेयावद्भूतसंप्लवं। १८९। सप्तर्षयः प्रसिद्धाः। नागवीथ्येरावतपथः। सदृतत्वेतावंतएवाष्टाशीतिसहस्रसंख्यामुनयः। सर्ववारंभविवर्जिताः। केवलज्ञाननिष्ठास्तपोब्रह्मचर्ययुक्तास्तथासंगत्यागिनोदेवलोकंसंप्राप्तिणाः। आभूतसंप्लवंप्राकृतप्रलययंतमवतिष्ठंतोतत्रस्थिताः सस्थाद्वाध्यात्मिकधर्माणांप्रवर्तकाकथंभूतास्ता

मुनयइत्यत्राह। यतोवेदाःपुराणानिविद्योपनिषदस्तथा। श्लोकासूत्राणिभाष्याणियच्चकिंचनवाङ्मयं। १९०। यतोहिविधाश्रयिमुनिसमूहाश्चत्वारोवेदाःपुराणंगविद्योपनिषदश्चनित्यभूताधेवाध्येतृपरंपरयाताःप्रवक्तारस्तथाश्लोकाइतिहासात्मकाःसूत्राणिचशब्दानुशासनमीमांसागोचराणि। भाष्याणिचसूत्रव्याख्यानरूपाणि। यद्न्यद्वायुर्विद्यादिकंवाङ्मयंतद्यियत्सकाशात्प्रवृत्तं। तथाविधास्तेमुनयोधर्मप्रवर्तकाः। एवंसतिवेदस्यापिनानित्यतादोषप्रसंगः। ॥ ततकिमित्याह। वेदानुवचनंयज्ञोब्रह्मचर्यंतप्रोहमः। आद्यंपदंवामःस्वातंत्र्यमात्मनोज्ञानहेतवः। १९१। वेदःस्यनित्यत्वेसतितत्प्रामाण्यबलाद्वेदानुवचनाद्यःसर्वमुध्यापारन्नद्योरणात्मज्ञानस्यहेतवइत्यर्थोपपन्नोभवति। किंच। ॥ सद्भाभूतमेविज्ञातास्यःसम्प्रत्यैरवमेवतु। द्रष्टव्यश्चयमंतव्यःश्रोतव्यश्चद्विजातिभिः। १९२। तएतमेवंविदंहंतियेचारण्यकमाश्रिताः। उपासतेद्विजाःसत्यंब्रह्मप्रायापरायुताः। १९३। यस्मान्नित्यतयाप्रमोणाभूतोवेदस्तस्माद्वसाकुक्रमार्गेणसकलाश्रमिभिर्नानाप्रकारंजिज्ञासितव्यस्तमेवप्रकारंदर्शयतिद्विजातिभिरवेष्योऽपरोक्षीकर्तव्यस्तत्रोपायंदर्शयन्नाह। श्रोतव्योयमंतव्यइतिपथमतोवेदांतश्रवणंनिर्णेतव्यस्तदनंतव्योयुक्तिभिर्विचारयितव्यस्ततोसौध्यानेनापरोक्षीभवतियेद्विजातयोजितिशयश्रद्धायुक्ताःसतोर्जनप्रदेशमाश्रिताःसवमुक्तेनमार्गेणोवमात्मानंसंपरमार्थभूतमुपासते। तत्रात्मानंविदंतिलभंतेप्राप्नुवंति। प्राप्तिमार्गदेवयानमाह। क्रमात्तेसंभवंस्वर्चिरहःशुक्लंतथोत्तरं। अयनंदेवलोकंचसवितारंसवैद्धते। १९४। ततस्तान्पुरुषोभ्येत्यमानसोब्रह्मलोककान्। करोतियुनरावृत्तिस्ते

मामिहनविद्यते ॥१९५॥तेविरिंचात्मानःक्रमाद्ब्रह्माद्यभिमानिदेवतास्थानेषुमुक्तिमार्गभूतेषुविघ्नभ्यस्तैःप्रस्थापिताःपरम
पदंमाप्नुवंति। अर्चिर्वद्भिरहर्दिनशुक्लषण्मासउत्तरायणंदेवलोकंसुरसंघासविताःसूर्यःवैद्युतंचतेजस्थाने
वैकुंठमार्चिरादिस्थानंगतानमानसःपुरुषोब्रह्मलोकभाजःकरोति।तेषामिहसंसारेपुनरावृत्तिर्नविद्यते।किंतुप्राकृ
तप्रतिसंचरवन्मरेत्यक्तलिंगशरीराःपरमात्मनेकीभवंति।एवोक्तपितयाणमाह॥ ॥यज्ञेनतपसाहानेर्यहिस्वर्गजितो
नराःध्रुवंनिशांकृष्णपक्षंसक्षिणायनमेवच॥१९६॥पितृलोकंचंद्रमसंवायुंवृष्टिंक्षणमहीं।क्रमात्तेसंभवंतीहपुनरे
वव्रजंतिच॥१९७॥एतेद्योनविदानातिमार्गद्वितयमात्मवान्॥इष्ट्वाकःपतंगोवाभावेत्कीटोथवाकृमिः॥१९८॥येपु
नर्विहितेर्यहानतपोभिःस्वर्गफलभोक्तारःस्तेक्रमान्नब्रह्माद्यिचंद्रपर्यंतपदार्थाभिमानिनीदेवताःप्राप्यपुनरेववा
युवृष्टिजलभूमीःप्राप्यव्रीह्याद्यन्नरूपेणासृक्त्वमवाप्यसंसारिणोयोनिंव्रजंतिएतन्मार्गद्वयंप्रमत्तोयोनविजाना
तिमार्गद्वितयोपायभूतधर्मानुष्ठानंनकरोत्यासोदृष्टकोमुडंगःपतंगःशलभःकृमिःकीटोवाभवेत्।उपासनाप्रका
रमाह॥ऊरूस्थोज्ञानचरणःसव्येनपस्येतरंकरंउत्तानंकिंचिदुन्नास्यमुखविष्टभ्यचोरसा॥१९९॥निमीलिताक्षःसत्वस्थो एम
हृतेहृतानसंस्पर्शनान्॥तालुस्थाचलजिह्वाग्रसंहतास्यःसुनिश्चलः॥२००॥संनिरुध्येंद्रियग्रामंनातिनीचोच्छ्रितासनः।द्वि ५४
गुणांत्रिगुणांत्रिगुणांवापिप्राणायामाभ्यासमुपक्रमेत्॥२०१॥ततोध्वयुःस्थितोयोसौहृदयेदीपवत्प्रकंपःप्रभुःस्थितो॥ध्यातव्यतत्र
चहृद्यात्मानमनोगोचरतयाधारयेत्तधाधारणाबधारयेहारणास्वरूपंवक्ष्यामहेनच्छोटिकास्फानकालोमात्रा
भिःपंचदशमात्राभिरधमःप्राणायामस्त्रिंशद्भिर्मध्यमःपंचचत्वारिंशद्भिरुत्तमइत्येवंप्राणायामत्रयात्मकेकाधा
रणातास्तोयोगशब्दवाच्यास्ताश्चधारयेद्यथोक्तमन्त्रसंभ्रांम्पछोटिकाद्यास्फोटनंत्रजानुमंडलमात्राभिःपंचदश
भिःधारणायामोधमःस्मृतः।मध्यमोद्विगुणःप्रोक्तस्त्रिगुणोधारणात्तथात्रिभिस्त्रिभिःस्मृतैरेकैकास्ताभिर्योगस्तथैवचे
ति॥धारणात्मकयोगाभ्यासेप्रयोजनमाह॥अंतर्धानिस्मृतिःकोतिर्दृष्टिःश्रीस्तत्तत्तथागतिंशरीरमुत्सृज्यपरकाय
प्रवेशनं॥२०३॥अर्थानोछंदतःसृष्टिर्योगस्यैश्वर्यलक्षणं।सिद्धयोगेत्यजन्देहंमुक्तत्वायकल्पते॥२०४॥अरिष्टमप्रा
ह्यापरैरदृश्यत्वंमनर्थानं।स्मृतिर्नींद्रियेषूपर्यर्थेषुमन्वाद्देरिवस्मरणंकृतिः।कमनीयतादृष्टिरतीतानागतेष्वप्य
र्थेषु।तथाश्रोत्रहृताअतिदूरीयसिदेशेभिव्यज्यमानतयाश्रोत्रपथमनासेदुःखामपिशब्दानाहृतानिजशरीरस्या
गेनपरशरीरप्रवेशनंस्ववांछावशेनार्थानांकरणानिरपेक्षतयासृष्टिरियंतंयोगस्यसिद्धेर्लक्षणंलिंगं।नचैतावं

रेवप्रयोजनं॥किंच॥सिद्धेयोगेसुज्ञानस्यमोक्षस्यकल्पते॥ब्रह्मत्वनाप्रयेच्चभावतियत्नज्ञानायसंभवेत्सत्यमुक्षवुपायांतर
माह॥अथवाप्यभ्यसनवेदंन्यस्तकर्मावनेवसन्॥अयाचिताशीमितभुक्परंसिद्धेमवाप्नुयात्॥२०५॥अथवायत्रक्व
म्यनिषिद्धकर्मान्यतमवेदमभ्यस्यन्नेकांतशीलशीलोऽयाचितमिताशेनापादितसत्वशुद्धिरात्मोपासनेनपरंमु
क्तिलक्षणांसिद्धिंप्राप्नोति।किंच॥न्यायागतधनस्तत्वज्ञाननिष्ठोतिथिप्रियः॥स्नाद्धकृत्सत्यवादीचगृहस्थोपिहिमु
च्यते॥२०६॥सत्यंतिथिंहादिन्यायेनोपार्जितधनोतिथिंपूजयन्नित्यंनैमित्तिकंश्राद्धानुष्ठाननिरतः॥सत्यवदनशीलःस
न्नात्मतत्वध्याननिरतोगृहस्थोपिहियस्मान्मुक्तिमाप्नोतितस्मान्नकेवलंमेहिकपारिव्राज्यपरियहएवमुक्तिसाधनं॥
॥इत्यध्यात्मप्रकरणं॥वर्णोत्तमेतरांनोक्त्वाहिधर्मानशेषतइत्यत्रप्रतिपाद्यतयाप्रतिज्ञातषड्विधधर्ममध्येपंच
प्रकारंधर्ममभिधायाधुनावशिष्टंनैमित्तिकंधर्मजातंप्रायश्चित्तपदाभिलषितंप्रतिपिपादयिषुःप्रथमंतत्प्रयोजनार्थमधिका
रिविशेषणप्रदर्शनार्थंचार्थवादरूपंकर्मविपाकंतावदाहमहापातकज्ञानघोरान्नरकान्प्राप्यहारुणान्॥कर्मक्षयात्त
तायंतेमहापातकिनस्तेकिंनाप्नुवंतीत्यपेक्षायामाह॥२०७॥ब्रह्महत्यादिपंचकस्यमहापातकसंज्ञाब्रह्महामद्यपत्रव्रतेतत्संघो
गोमहापातकिनस्तेमहापातकज्ञानितांस्तामिस्रादिनरकान्स्वज्ञानितदुष्कृतानुरूपान्घोरान्प्राप्यतितीव्रवेदनापादन एम
त्वेनातिभयंकरान्दारुणान्दुःखैकभोगनिलयान्घोरान्प्राप्यकर्मक्षयात्कर्मजन्यनरकदुःखावापभोगेनक्षयादनंतरंकर्मशेषात्पुनर्गृहसंसार

दुःखबहुलंस्थावरशरीरादितिर्यग्योनिषुप्रकर्षेणभृशंयोजायंते।महापातकिनश्चैतेमितरेषांप्रत्युपपातक्यादीनामु
पलक्षणार्थं।तेषांचतिर्यगादियोनिप्राप्तेर्वक्ष्यमाणत्वात्।महापातकिनांसंसारप्राप्तिमुक्त्वातद्विशेषकथनमाह॥सू
करोष्ट्रखरश्वानांवस्तहारोनिषेवते॥खरःपुल्कसवेनानांसुरापानात्रसंशयः॥२०८॥कृमिकीटपतंगत्वंस्थावरांहा
रीसमाक्रयाते॥तरागुल्मलतात्वंचक्रमशोगुरुतल्पगः॥२०९॥मृगाहरिणाद्दयः।श्वसूकरोष्ट्राःप्रसिद्धाःतेषायोनिं
ब्रह्महास्वकर्मशेषेणाप्नोति।खरोरासभःपुल्कसःप्रतिलोमनिषादेनशूद्रायांजातः।वेदेहिकेनांवध्यांजातोवेनः
स्तेषांयोनिंसुरापःप्राप्नोति॥कृमयःसजातीयसंभोगनिरपेक्षामांसविष्ठागोमयादिजन्यास्ततःकिंचित्स्थूलत
राःपक्षास्थिरहिताः।सजातीयसंभोगरहितापिपीलिकाद्दयःकीटाःपतंगःशलभस्तेषांयोनिंब्रह्मरागःस्वर्णहा
रीप्राप्नुयात्।तरांकाशकुशादिगुल्मलतेप्रागुक्ते।तज्जातीयतांक्रमेणगुरुतल्पगःप्राप्नोति।एतज्ज्ञापकमकृतवि
षयंकामकारकृतेत्वन्यास्वपिदुःखबहुलायोनिषुसंसरंतिति॥यथाहमनुः॥श्वसूकरखरोष्ट्राणांगोजाविमृगपक्षिणां॥वां
जातपुल्कसानांसुरापोब्रह्मणोव्रजेत्तलतां॥हिंस्राणांचैवपिशाचानांस्तेनोविप्रसहस्र
शः।लतोर्णनाभिःसरटःकृकलासश्चतांस्मरेत्॥तरागुल्मलतानांचक्व्यादांद्दंष्ट्रिणामपिक्रूरकर्मकृतांचैवशतसोगुरुत
ल्पगःव्रजतीति॥किंच॥ब्रह्महाक्षयरोगीस्यात्सुरापःश्यावदंतकः॥हेमहारीतुकुनखीदुःश्वमीगुरुतल्पगः॥२१०॥यायेनसंवस
त्येषांसतत्तिर्यग्योनिमाप्नोति॥एवंशैरवीष्वनिरकेषुश्वकरखरादियोनिषुचहारुणंदुःखमनुभूयानंतरंदुरितशेषेणाज

गव्यंविडुजोवेवपक्षिणं॥हिंस्राणांचैवसत्वानां॥

ननसमयएवक्षयरोगाद्यैस्सशायुक्तदुःखप्रचुरेषुमानुषशरीरेषुसंसरति।तत्रब्रह्महाक्षयरोगीराजयक्ष्मीभवेत्।
निषिद्धसुरापानस्वभावतःसुरांसुरशनःब्राह्मणाहेम्नोहर्त्ताकुत्सितनखत्वे।गुरुदारगामीदुःश्वर्मत्वेकुष्ठित्वे।एतेषांब्रह्महणांमध्येयेनपतितेनयःपुरुषःसंवत्सरंतप्तांग्नेयीमिज्यायते।किंवा।अन्नहनीमयावीस्यान्मकोवागपहारकः।यावीस्यान्मकोवागपहारकः॥२११॥धान्यामिश्रोतिरिक्तांगःपिशुनःप्रतिनामिकःतैलहेतैलपायीस्यात्तिक्तरसस्य
क्तकः॥२१२॥अन्नस्यायहनीत्रामयावीअजीर्णान्नःवागपहारकोअननुज्ञाताध्यायीपुत्रकोपकरीचम
कोवागिंद्रियविकलोभवेत्।धान्यमिश्रोतिरिक्तांगःषडंगुल्यादिःपिशुनोन्यविद्यमानपरदोषप्रख्यापनशीलो
दुर्गंधिनासिकःतैलस्यहनीतैलपायीकिटविशेषोभवति।सचकीटोषमकीटोनिःदुर्गंधिवस्तुजायते।एत
द्वातियैकत्वप्राप्युत्तरकालंमानुषशरीरप्राप्तोद्रव्य।यद्वातद्वापरद्रव्यमयहत्यबलान्नरः।अवश्यंया
तिनिर्यक्कुलस्थांवाकुरुतेहविःइतिमनुस्मरणात्।किंच॥परस्ययोषितंहत्वाब्रह्मस्वमपहृत्यच।अरण्येनिर्जलेदेशेभवतिब्रह्मराक्षसः॥२१३॥यःपरद्रव्यंनापहरति।ब्रह्मस्वंवासुवर्णंव्यतिरिक्तमपहरति।अमावरायेनि
र्जलेप्रदेशेब्रह्मराक्षसोभूतविशेषोजायते॥किंच॥कीनाशोप्रजायेतपररत्नापहारकः॥पत्रशाकंशिखींहृत्वा गंधान्नछुछुंदरीशुभान्॥२१४॥हीनतांतोहमकांस्यायांपक्षितांतोपुररत्नापहारकोजायते॥यथाहमनुः
मणिमुक्ताप्रवालान्यहृत्वालोभेनमानवः॥विविधानिचरत्नानिजायतेहेमकर्त्रिषु॥तथापत्रात्मकंशाकं

हृत्वामयूरःशुभानगंधानपहृत्यछुछुंदरीगोजडुहिंत्रास्यामूषिकाजायतेकिंच॥मत्वकोधान्यहारीस्याद्घानमुद्गं
फलंकपिःजलंभ्रुवःपयःकाकोगंधकारीक्षपस्करः॥२१५॥मधुदंशःपलंगृध्रोगोधाग्निबकस्तथा॥क्षीरंवत्स
स्यारसंतुवीरलवणाहारकः॥२१६॥धान्यमहार्यासुर्यानंहत्वाउष्ट्रःफलंकपिःवानरःजलंभ्रुवःशकटविलाभूक्षः प
क्षीक्षीरंध्वांक्षोगंधहोपस्करंमुशलादिहृत्वागंधकारीवरटाक्षःकीटविशेषः।मधुहृत्वादंशमत्कुणःकीटःपलंमां
संहृत्वागृध्रोरक्षः पक्षी।गांहृत्वागोधाख्यःप्राणिविशेषः।अग्निंहृत्वाबकाख्यःपक्षीवस्त्रंहृत्वाभिक्षीक्ष
वोहिरण्यंहृत्वासारमेयःलवणहारीवीर्याख्यःउच्चैस्वरःकीटः।स्वंग्रहणेनार्थंकिंचिद्वस्तुप्रतिद्रव्यंपशवो
दैनवक्रमशस्तत्तेकोपाधिताकर्मविपाकंदर्शयितुमाह॥प्रदर्शनार्थमेतन्मयोक्तंस्तेयकर्मणि॥द्रव्य
प्रकारहियथाघातयेवप्राणिजातयः॥२१७॥द्रव्यस्यापक्रियानस्ययादृशाःप्रकारास्तादृशाएवप्राणिजातयस्ते
यकर्मण्यपहर्त्तारोभवंति।यथाकांस्यहरीहंसइति।अथवायत्कृतमाधनंद्रव्यमपहरतितत्साधनविक
लोयथापंगुर्नाम्नवहारकइति।शेषेनकृचिद्विशेषादर्शितः।ब्रह्महाकुष्ठीतेजसापहारीमंडलीरेवब्रा
ह्मणस्वर्णोशकःस्वर्णतिर्यग्रहाग्निरोउन्मत्तोगुरुंप्रतिहंतापस्मारीगोघ्नश्चांधोधर्मपत्नीमुक्तान्यपत्रप्रहृतःश
रेवधीप्राणिविशेषःकुंडाशीभगभक्षोरेवब्राह्मणास्वापहारीपांडुरोगीन्यासापहारीचकाणःस्त्रीपरस्वापजी
वीषंढःकौमारहारत्यागीदुर्भगोमिथ्याभिशस्तोवातगुल्मीअभक्ष्यभक्षकोगंडमालीब्राह्मणगामीनिर्वीजः।क्रू

रकर्मीवामनोवस्त्रापहारीपूतंगःशय्यापहारीक्षपणाकःशेरवसुन्यायहारीर्कपात्रीहीपापहारीकोशिकोमित्रघ्नक्षयीमातापित्रोराक्रोशकःखंडकारइति।गोतमोपिकृच्छ्रविशेषमाह॥अनृतंवाकृत्स्वाद्वोमुहुर्मुहुःमेलनंवाकृत्वोरोद्वारत्यागीकूटसाक्षीप्लीपदीउच्छ्रनजंघचरणः।विवाहविघ्नकर्त्ताछिन्नोष्ठः अवगीरणाःछिन्नाहस्तोमातृघ्नोधः स्रुषागामीवातवृषणाःचतुष्पथविण्मूत्रविसर्जनीमूत्रकृच्छ्री कन्यादूषकःषंढःईर्ष्यालुर्मशकःपित्रा विवदमानोऽपस्मारीन्यासापहार्यनपत्यःस्त्रीपहार्यस्यंतरश्चिद्वाविक्रयीपुरुषमृगोवरविक्रयीस्त्रीपीवहयाडँचकोजलप्लवः।अयाज्ययाजकोवाहोऽनिमंत्रितभोजीवायसःमिष्टकभोजीवानग्नेयतस्तोऽन्नमाजीरःकक्षवनस्रुनातरक्षाकावायोमुखविगंधिःपर्युषितभोजीक्रिमिरक्तादापीबलीवर्दोमत्सरीभ्रमरोऽमृतादीमंडलकुष्टीसूद्राचार्यःश्वपाकोगोहर्तामर्कःस्नेहापहारीक्षयीअन्नापहार्यजीर्णान्नःतानापहारीमत्कुंडाशीपुष्पफलीगमनेऽजगरःप्रव्रजितागमनेमनुष्यादःचःभल्लीगमनेदीर्घकीटःसर्ववर्णाभिगामीरिड्डोजलहारीमत्स्यःक्षीरहारीबलाकोवार्धुषीकांगहीनोऽविक्रयीक्रयीगृध्रोराजमहिषीगामीनपुंसकोराजाक्रोशकोगर्दभोगोगामीमंडूकोऽनध्यायाध्यायनेऽगालःपरद्रव्यापहारीपरप्रेष्यामन्यवधेगर्भवासीत्येतेऽनर्थ्यगमनाइतिस्त्रियोप्येतेष्वनिमित्तेषुपूर्वोक्तास्वेवजातिषुस्त्रीत्वमनुभवंति॥ ॥यथाहमनुः।स्त्रियोप्येतेनकर्त्त्ये

~~नचोत्पन्नमात्रेरागद्वेषकारणापूर्वनाशोजन्यतेमंथनजन्यतेजन्यसुखशानेवा~~

नहत्वाशेषमवाप्नुयुस्तेषामेवतंतूनांभार्यात्वमुपयांतिताःस्मृतिः।एतच्चक्षयित्वादित्यक्षरायकथनं प्रायश्चित्तोन्मुखीभूतब्रह्महाद्यंगजननाथेनपुनःक्षयित्वादित्यक्षरायुक्तानांद्वादशवार्षिकादिव्रतप्रायश्चित्तस्यार्थंसंसर्गनिवृत्त्यर्थंवा।तथाहिपापक्षयार्थंप्रायश्चित्तेनचप्रारब्धफलपापाऽपूर्वविनाशेकिंचनप्रयोजनमस्तिनहिकार्मुकनिर्मुक्तोबाणोलक्ष्यवेधेव्यापारस्यवासत्तांपुनरपेक्षते।नचतद्वारब्धफलनाशार्थीपूर्वनाशान्वेषणीयःनहिनिमित्तकारणाभ्यांचक्रचीवरादिविनाशेनतद्वारककारकादिविनाशःनचनैसर्गिकंकोनरक्षादिकंप्रत्यानेतुंशक्यतेकिंचनरकतिर्यग्योन्यादिदुःखपरंपरामनुभवतःकोनरक्षादिकोविकारश्चरमंफलंते ~~नचोत्पन्नमात्रेरागद्वेषकारणापूर्वनाशोजन्यतेमंथनजन्यतेजन्यसुखशानेवा~~ वारणाक्षपणस्तस्मान्नपापविनाशार्थंव्रतचर्यानापिसंव्यवहारार्थंनहिशिष्टाःकुनरक्षादिभिःसहसंबंधंपरिहरंतिप्राचीननिरयात्यापनाशेनसंव्यवहार्यार्थंलक्ष्यतेसिद्धेनोर्थोव्रतचर्यया॥पक्षवमिश्रेणोक्तंकुनखीश्यावदितश्चक्रद्वाद्दशरात्रंचरेदिति।तक्षामवत्यादिवन्नैमित्तिकमात्रेनपुनःपापक्षयार्थंसंव्यवहार्यत्वसिध्यर्थंचेतिमंतव्यं॥किंच॥यथाकर्मफलंप्राप्यतिर्यक्कंकालपर्ययात्॥जायंतेतेक्षयेणाशुहरिद्राःपुरुषाधमाः॥२९॥यथाकर्मचदुःकृतानतिक्रमेनुतदनुरूपंनरकादिफलंतिर्यग्त्वंचप्राप्यकालक्रमेणाक्षीणे

मि प्र ५०

कर्मणोदुष्टलक्षणा ह्रीड्राश्वपुरुषेषुनिंदकषाड्डायंते॥ किंचातत्तोनिःकल्मषीभूतः कलेमहतिभोगिनःडायं
तेविधयोवेतांश्चानधान्यसमन्विता॥२८॥ ततोदुर्लक्षणा मनुष्यजन्मानंतरंनिःकल्मषीभूतानरकाद्यपभोग
क्षयेराक्षीणापापाः प्राग्भवीयशुभशेषतोमहाकुलेभोगसंपन्नाविद्याधनधान्यसंपन्नाजायंते॥एवंप्राया
श्चित्तेषुप्रोक्षणंनार्थकर्मविपाकमभिधायाधुनातेषांवाधिकारिणांनिरूपयितुमाह॥विहितस्यानुष्ठानान्नि
षिद्धस्यचसेवनात्॥अनिग्रहाच्चेंद्रियाणांनरःपतनमृच्छति॥२९॥तस्मात्तेनेहकर्त्तव्यंप्रायश्चित्तंविशुद्धये
स्वप्नस्यांतरात्मावलोकयेवप्रसीदति॥३०॥विहितमितियावश्यकंसंध्योपासनाग्निहोत्रादिकंनित्यंशुचिरशु
चिनैमित्तिकेनचोदितस्तानाहिकंचतद्उभयमुच्यते॥तस्याकरणात् निंदितस्यनिषिद्धस्यसुरापानादेःकरणा
ताच्चेंद्रियाणामनियहाच्चनरःपतनमृच्छतिप्रायेणप्रायश्चित्तप्रत्ययवायीभवतीतियावत्॥नत्विंद्रियार्थेषुसर्वेषुनप्रसज्य
तकामतइतिचेंद्रियप्रसक्तेरपिनिषिद्धत्वान्निंदितग्रहणेनैवगतार्थत्वात्किमर्थमनियहाच्चेंद्रियाणामितिएव
मुपादानं॥अत्रोच्यतेइंद्रियप्रसक्तिर्निषिद्धत्वेनैकांततःप्रतिषेधरूपतयात्मकंधर्ममध्यस्यपाठात्तत्रचव्रतानी
मानिधारयेदितिव्रतशब्दाश्चिकारान्नत्रश्चश्रवणाच्चेंद्रियप्रसक्तिःप्रतिषेधकैःसंकल्पोविधीयतेसचोभयरूपइ एम
तिएथगुपादानं॥ननुविहितकरणान्नप्रत्यवैतीतिकुतोवसिष्ठेनतावद्अग्निहोत्रादिचोदनापुरुषप्रवर्त्तनात्मिका ५०
ननुष्ठानस्यप्रत्यवायहेतुनामाक्षिपतिविषयानुष्ठानस्यपुरुषार्थत्वावगतिमात्रपर्यवसायिनीहिसा॥तावन्मात्रेण

प्रवृत्तरूपपत्तेर्नपुनरकरणस्यप्रत्यवायहेतुत्वमपिवक्तुंशक्यंतथाहनुपपत्तेः॥किंच॥ ॥यद्यनुपपत्तुँश
मेपिप्रवृत्तिसिध्यर्थमर्थात्तत्कल्प्यते॥नहिनिषिद्धमानाक्रियाजन्यप्रत्यवायपरिहारार्थंतयैवतद्भजनस्यपुरुषा
र्थत्वसिध्यावपिफलांतरंकल्पितानेवतत्कर्त्तुरिदमिसमंतं॥ननुयथानिषिद्धेष्वर्थवादाःवगतप्रत्यवायपरिहारार्थं
तयैवपुरुषार्थत्वंतथाविहितेष्वपर्थवादावगताःकरणजन्यप्रत्यवायपरिहारार्थताकस्मान्नस्यात्॥मैवंनाहिम
वंत्राग्निहोत्रादिषुतादृग्निषेधार्थवादाःसंतिननुविहितस्याननुष्ठान्नरःपतनमृच्छतीतीयंस्मृतिरेववाक्यशेष
स्थानीयेतिचेन्न॥नहिवाक्यांतरप्रमितेकार्यवाक्यांतरेणार्थवादःसंभवतिभवतुवाकथंचिद्वाक्यां
तरार्थवादेनतत्सारेचलीघनंपरमौषधमित्यापुर्वेरवचनाद्रोगनिरासायापिनाऽभावरूपंविहितंकरणंका
र्यांतरंजनयितुंक्षमते॥ननुज्वरेचेत्यनाभावरूपंलंघनंज्वरशांतिंजनयतीतियथावगम्यतेतथात्रापिभवतु॥
॥मैवं॥यतोनात्रापिलंघनातज्ज्वरशांतिंकिंतर्हिज्वरनाशप्रतिबंधकभोजनाभावसंतत्याठरानलपरिकपाज
नितामग्नातुसाम्यास्थितिमंतव्यं॥तस्माद्विहितस्याननुष्ठानात्यतनमृच्छतीतिकथमस्याःस्मृतेर्गतिरितिवाच्यं॥उ
च्यते॥अग्निहोत्रादिविषयाश्चिकारासिद्धरूपप्रत्यवायाभिप्रायेणतिनदोषः॥ननुवांताशुक्लामुखःप्रेतोविप्रो
भवतिविच्युतःशूमेध्यकुणपाशीशुक्षत्रियःकटपूतनःमैत्राक्षज्योतिकःप्रेतोवैश्योभवतिपूयभुक्चैलाशक
लभवतिशूद्रोधमोत्स्वकाक्षुतरंतिएतानिविहिताकरणप्रत्यवायपरिणामनुवचनानिकथंघटंते॥उच्य

तोऽयथावांतमश्नतउत्कयाऽद्यमानमुखस्यदुःखंतथास्यापिविहितमकुर्वतःपुरुषस्यपुरुषार्थांमिद्धैरित्यकरणा
निरूनमनुष्ठानप्रयोचनार्थमित्यविरोधश्यकृत्प्रागभवीयनिषिद्धाचरणाश्लिष्टविहितानुष्ठानविरोधिरागालस्यादि
जन्यैवांतायुल्कोमुखप्रेतत्वादिरूपमितिनक्तंचिद्भावस्यकारणंतन्निमंतव्यानतुपुंश्चल्यौवानरखरदृष्टमि
त्यभिशस्तादोविहिताकरणादिनिमित्तानामन्यतमस्याप्यभावात्कथंप्रत्यवायितोकथंचतद्भावेप्रायश्चि
त्तविधानंउच्यतेऽस्माद्देवपाप्रेयार्थंप्रायश्चित्तविधानाज्ज्ञन्मांतराचरितनिषिद्धमेवाद्दिजन्यंपापापूर्वसः
माक्षिसमिथ्याभिशापास्किंतन्निमित्तप्रायश्चित्तायनोद्यमनेनानुष्ठितमितिकल्प्यतेपुरुषप्रयत्नैरपेक्षेणाका
र्यरूपपापोत्पत्तेःनचपुंश्चल्यादिगतप्रयत्नेनपुरुषांतरेपापोत्पत्तिःकर्तृसमवायित्वनियमाद्धर्मा
धर्मयोरसमाधिकेवप्रायश्चित्तेनिमित्तत्वपरिगणना॥ ॥तथाचमनुः॥अकामतोकृतेपापेविहितेकर्मनिंदितेचसमा
चरन्प्रमत्तश्चेंद्रियार्थेषुप्रायश्चित्तीयतेनरैरिति॥नरयहरणाप्रतिलोमजातानामपिप्रायश्चित्ताधिकारप्रा
प्त्यर्थंतेषामपिहिंसाहिंसाधारणधर्मव्यतिरिक्तेसंभवात्॥यस्मादेवंनिषिद्धाचरणादिनाप्रत्यवैतिततस्मात्ते
नकृतनिषिद्धसेवादिनापुरुषेणप्रायश्चित्तंकर्तव्यंरुत्वाकेपरत्रचविमुध्यर्थंप्रायश्चित्तशब्दप्रायपापक्षु
यार्थेनैमित्तिकेकर्मविशेषरूपएवप्रायश्चित्तंकृतोऽस्यातरात्मासुकृतयाप्रसीदतिलोकस्वंव्यवहर्तुंप्रसी
दतिएवंचतदृष्टिंतेनैमित्तिकोयंप्रायश्चित्ताधिकारः॥तत्रार्थवादिगऽदुरितक्षयोपिज्ञातेहिन्यायेनसाध्य

तयाश्चिक्रियतेनचदुरितपरिहासेनानुष्ठीयतइत्येतावतोकामाधिकारशंकाकार्यायस्माच्चरितव्यमतोनित्यंप्राय
श्चित्तंविशुद्धयेनिषेधहिलक्षणरोर्युक्तोजायंतेऽनिःकृतैनसइत्यकरणेदोषस्मरणेनावश्यकत्वावगमात्॥प्रायः
श्चित्तोकरणेदोषमाहप्रायश्चित्तमकुर्वाणाःपापेषुनिरतानराःअयश्चित्तापिनःकृष्णान्नरकानयांतिहारुणान्
॥२२३॥पापेषुशास्त्रार्थव्यतिक्रमजनितेषुप्रसक्ताःपुरुषाःअपश्चात्तापिनोमयाहुःकृतमित्येवमुद्वेगरहिताःप्रा
यश्चित्तमकुर्वाणाःदुःसहान्नरकान्माक्रवंतीनरकस्वरूपेविदूरवर्त्याह॥तामिस्रंलोकशंकुंचमहानिरयशा
ल्मली॥रौरवंकुड्मलंपूतिमृत्तिकंकालसूत्रकं॥२२३॥संघातंलोहितोदंचसविषंसंप्रपातनं॥महातरुकाकोले
संजीवनमहापथं॥२२४॥अवीचिमंधतामिस्रकुंभीपाकंतथैवच॥असिपत्रवनंचैवतपनंचैकविंशकं
॥२२५॥महापातकजेघोरेरुपपातकजेनृणां[redacted]रुधा॥अन्वितायांत्यश्चरितप्रायश्चित्तानराध
माः॥२२६॥तामिस्रप्रभृतीन्तपनपर्यंतानेकविंशतिनरकान्कर्मार्थसंज्ञाद्योतितान्नैवांतरमेत्यमहापात
कोपपातकजनितभयंकरहरितेरन्विताचरितप्रायश्चित्ताःपुरुषाधमाःप्राप्नुवंतिउपपातदुरितनिरास
र्थंप्रायश्चित्तमित्यत्रैविशेषार्थमाह॥प्रायश्चित्तेरपेक्षेयेनोयद्दानकृतमवेत्॥कामतोव्यवहार्यस्मृवचना
द्दिहजायते॥२२७॥प्रायश्चित्तैरवैरूपमाणोरहानाघैरनःपापंकृतंतरत्यैतिगच्छतिज्ञानकामतःकृतंकिंतु
त्रप्रायश्चित्तं[redacted]विधायकवचनबलाद्दिहलोकेव्यवहार्योजायतेअत्रचप्रायश्चित्तेरपेक्षेयेनो

यदज्ञानकृतमित्युपक्रमात्तत्प्रतियोगितयाज्ञानत इति वक्तव्ये यत्कामत इत्युक्तं तत्ज्ञानं कामनयोस्तुल्यत्वप्रदर्शना
र्थं। तथा हि। विहितं यदकामानां कामात्तद्विगुणं भवेत्। तथा। अबुद्धिपूर्वं क्रियायामर्धं प्रायश्चित्तं। तथा। म्लेच्छेना
धिगतः शूद्रस्त्वज्ञानात्तु कथंचन। कृच्छ्रत्रयं प्रकुर्वीत ज्ञानात्तद्विगुणं भवेत्। इत्यादिभिर्वचनैर्ज्ञानकामनयोस्तुल्यप्रा
यश्चित्तदर्शनात्तुल्यफलतैव। किंच॥ स्वतंत्रप्रवृत्तिविषयज्ञानकामनाभ्यां नियतातयोरन्यतराभावेपि तस्यासं
भवादतः कामत इत्युक्तं ज्ञानं ज्ञानत इत्युक्तेपि कामप्राप्तेरविनाभावात्॥ नच चौरादिभिर्बलात्प्रवर्त्यमान
स्य सत्यपि विषयज्ञानेपि कामनाभावान्नाविनाभाव इति वाच्यं। यतोत्र विद्यमानस्यापि ज्ञानस्य प्रवृत्तिहेतु
त्वाभावेनासत्समत्वं। यत्तु शुष्केपि यतिषोर्भ्रात्याकर्दमपतनं। तत्रापि वास्तवज्ञानाभावात्तद्विषयकाम
नायाश्चाभाव एव। एवमज्ञानाकामनयोरव्यभिचार एव। ननु प्रायश्चित्तैरपैत्येन इति न युक्तं। फलविनाश्य
त्वात्कर्मणां। मैवं॥ यथा पापोत्पत्तिः शास्त्रगम्या तथा तत्परिक्षयोपीति नात्र प्रमाणांतरक्रमतेऽत एव पूर्वो
त्तरगौतमेन पक्षभंग्या अयमर्थो दर्शितस्तत्र प्रायश्चित्तं कुर्यान्न कुर्यादिति मीमांसंते। न कुर्यादित्याहुर्न
हि कर्म क्षीयत इति। कुर्यादित्यपरे। पुनस्तोमेनेष्ट्वा पुनः सवनमायंतीति विज्ञायंते। व्रात्यस्त्वोमेनेष्ट्वा तरति स
र्वपाप्माणं तरति भ्रूणहत्यां योश्वमेधेन यजत इति। पुनः सवनमायंतीति सवनं संपाद्य ज्योतिष्टोमादिद्विजा
तिकर्माणि योग्यो भवतीत्यर्थः। न वेदमर्थवादमात्रं। अधिकारिविशेषणाकांक्षायां। रात्रिसत्रन्यायेनार्थवादिकफ

लस्यैव कल्पनायान्याय्यत्वादतो युक्तं प्रायश्चित्तैरपैत्येन इति। ननु कामकृते प्रायश्चित्ताभावात्कथं व्यवहार्यत्वं तदभा
वश्चाऽनभिसंधिकृते पराधे प्रायश्चित्तमिति वसिष्ठवचनादियं विशुद्धिरुदिता प्रामाण्या कामतो द्विजं। कामतो ब्राह्म
णवधे निःकृतिर्न विधीयत इति मनुवचनाच्चावगम्यते। नैतत्। यः कामतो महापापं नरः कुर्यात्कथंचन। न तस्य
निःकृतिर्दृष्टा भृग्वग्निपतनादृते इति। तथा। विहितं यदकामानां कामात्तद्विगुणं भवेदिति च। कामकृतेपि प्रायश्चि
त्तदर्शनात्। यत्तु वसिष्ठवचनं तस्याप्यकामकृते पराधे प्रायश्चित्तं शुद्धिकरमित्यभिप्रायेण पुनः कामकृते प्रा
यश्चित्ताभाव इति। यच्च मनुवचनं। इयं विशुद्धिरुदितेत्यादि तदयीयमिति सर्वनाम्ना परामृष्टद्वादशवार्षिकादि
व्रतचर्याया एव। कामतो ब्राह्मणवधे निःकृतिर्न विधीयत इत्यनेन प्रतिषेधो न पुनः प्रायश्चित्तमात्रस्य। मर
णांतिकादेः प्रायश्चित्तस्य दर्शितत्वात्। ननु यदि कामकृतेपि प्रायश्चित्तमस्ति तर्हि पापक्षयोपि कस्मान्न स्या
दविशेषाद्यदि पापक्षयोपि नास्ति तर्हि व्यवहार्यतापि कथं भवति। उच्यते। उभयत्र प्रायश्चित्ताविशेषेपि फ
लविशेषः शास्त्रतोऽवगम्यते। अज्ञानकृते सर्वत्रापापक्षयः। यत्र तु ब्रह्महासुरापौ गुरुतल्पगमातृपितृयोनि
संबंधगस्तेन नास्तिकनिंदितकर्माभ्यां पतितात्याग्यपतितत्यागिनः पतिताः पातकसंयोजकाश्चेति गौत
मोक्तमहापातकादौ व्यवहार्यत्वं निषिद्धं। तस्मिन्पतनीये कर्मणि कामतः कृते व्यवहार्यत्वमात्रं न पापक्ष
य इति। न च पापक्षयाभावे व्यवहार्यत्वमनुपपन्नं। द्वे हि पापस्य शक्ती नरकोत्पादिका व्यवहारनिरोधिका

मि प्र
५३

चा। तत्रेतरशक्त्यऽविनाशेपि व्यवहारनिरोधिकायाः शक्तेर्विनाशो नानुपपन्नस्तस्मात्पापाऽनपगमेपि व्यवहार्यत्वं
नानुपपन्नं॥ यत्तु मनुवचनं॥ अकामतः कृते पापे प्रायश्चित्तं विदुर्बुधाः। कामचारकृते प्याहुरेके श्रुतिनिदर्शनादि
ति। तदपि कामकृतेपि प्रायश्चित्तप्राप्त्यर्थं न पुनः पापक्षयप्रतिपादनपरं। अपतनीये पुनः कामकृतेपि प्राय
श्चित्तेन पापक्षयो भवत्येव। अकामतः कृतं पापं वेदाभ्यासेन शुध्यति। कामतस्तु कृतं मोहात्प्रायश्चित्तैः पृथ
ग्विधैरिति मनुस्मरणात्॥ पतनीयेपि कर्मणि कामकृते मरणांतिकप्रायश्चित्तेषु कल्मषक्षयो भवत्येव। फ
लांतराभावात्॥ नास्यास्मिन् लोके प्रत्याप्तिर्विद्यते कल्मषं तु निहंत्यत इत्यायस्तंबस्मरणात्। निषिद्धाचः
रणादिकं प्रायश्चित्ते निमित्तमित्युक्तं तत्प्रपंचयितुमाह॥ ब्रह्महा मद्यपस्तेनस्तथैव गुरुतल्पगः। एते महापातकि
नो यश्चैतैः सह संवसेत्॥ २२८॥ हंतिरयं प्राणवियोगकरे व्यापारे रूढः। यद्व्यापारसमनंतरं कालांतरे वाकार
